In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी ग्रन्थमाला - 79

श्री विश्वनाथसत्यनारायणविरचितः

तेलुगुकथाबन्धः

हहाहूहूः

संस्कृतानुवादः

आचार्यः के.एस्.रामानुजाचार्यः

संस्कृत अकाडमी

राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था

उस्मानिया विश्वविद्यालयः, हैदराबाद्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला –79

श्री विश्वनाथसत्यनारयणविरचितः तेलुगुकथाबन्धः

हाहाहूहूः

संस्कृतानुवादः

आचार्यः के.एस्.रामानुजाचार्यः

आमुखम्

आचार्यः के.वी.रामकृष्णमाचार्यः

प्रधानसम्पादकः

श्रीनिवासः वरखेडी

निदेशकः

संस्कृत अकाडमी

राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था

उस्मानिया विश्वविद्यायः

हैदराबाद्

2010

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series- 79

Hā hā hū hū

By

Shriman Vishwanatha Satyanarayana

Sanskrit Translation by

Shri K.S. Ramanujacharya

Foreword

Prof.K.V.Ramakrishnamacharyulu

General Editor

Dr. Shrinivasa Varakhedi

Director

SANSKRIT ACADEMY

(Adarsha Shodha Sanstha, Rashtriya Sanskrit Sansthan, New Delhi)

Osmania University

Hyderabad - 500 007

Phone & Fax 040-27070281

Email – sanskritacademyhyd@gmail.com

2010

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series – 79
Ha ha hu hu a Telugu Novel by Vishwnatha Satyanarayana rendered into Sanskrit by **Shri K.S. Ramanujacharya**

ISBN – 978-93-80171-15-9

This publication has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, (Deemed University) Ministry of Human Resource Development Govt. of. India, New Delhi.

Publisher & General Editor: Dr. Shrinivasa Varakhedi
Director, Sanskrit Academy

Coordinator : Dr. V. Subrahmanyam
Dy. Director, Sanskrit Academy

© Sanskrit Academy

First Edition : 1984
Second Edition : 2010

Copies : 300

Price : Rs/-65
$ 6

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
Web: osmania.ac.in\sanskritacademy

Printed at: Karshak Art Printers, Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

Editorial

Sri Vishvanath Satyanarayana one of the celebrities in Telugu literature has authored a unique fantasy story titled "Haahaa huhuu" that attracted thousands of Telugu readers. Such a literary piece brought into Sanskrit would necessarily enrich the literature. With this idea, when we were looking for Sanskrit translations of modern literature, Prof.K.V.Ramakrishnacharyulu former Vice Chancellor of Jagadguru Ramanandacharya Rajasthan Sanskrit University, Jaipur and Member of our Academic Board, has suggest this work. We are happy to present this book to the readers in the eve of World Sanskrit Book Fair in Bangalore in January 2010.

We express our regards to late Sri.K.S.Ramanujacharya the translator of this work and thank his family members for giving permission to publish this novel. I am also thankful to Hon'ble of members of Managing Committee and Authorities of Rashtriya Sanskrit Sansthan, New Delhi.

Shrinivasa Varakhedi
Director

In Public domain. Digitization Muthulakshmi Research Academy

पुरोवाक्

विश्वभाषावाङ्मये एव अचिरेणैव कालेन प्रमुखं प्रथमप्रायं च स्थानं प्राप्तं *नावल्* अभिधानं साहित्यम्। *नावल्* इति आङ्गलभाषाशब्दस्य नूतनत्वं प्रवृत्तिनिमित्तम्। ततश्च विश्ववाङ्मये एव नूतनप्रक्रिया इयमन्वर्थाभिधा। एतत्प्रक्रियासमुद्भवात्परं अन्ये प्रकाराः सर्वे उपेक्षितप्रायाः दृश्यन्ते। अत्र च कारणं रचनाविषयकनिर्बन्धाभावः। सामान्यतः कविताया उत्पत्तौ प्रतिभया सह व्युत्पत्तेः अभ्यासस्य चापेक्षा वर्तते। व्युत्पत्तिश्च शास्त्रशिक्षया सम्भवति। ततश्च वाङ्मये प्रसिद्धाः सर्वा अपि प्रक्रियाः सम्यगधीतिभिरेव साध्याः। भाषायाः प्रयोगेऽपि तत्र निर्बन्धाः अधिकाः। अतश्च ताः सर्वाः अपि प्रक्रियाः सामान्यजनतया अप्राप्याः जाताः। इयं तु *नावल्* नाम्ना अभिधीयमाना प्रक्रिया भाषा-इतिवृत्त-स्वरूपादिविषयकनिर्बन्धरहिता बह्वनधीतिभिः सामान्यजनैः अपि प्रयतितुं शक्या। किञ्च काव्यप्रयोजनं सामान्यजनतापर्यन्तं नेयं चेत् तदवगमययोग्यभाषायां तदवगमयोग्यसन्निवेशादिकल्पनया च प्रयतनीयम्। तादृशप्रयासे एवोत्पन्ना इयं नूतनप्रक्रिया *नावल्* अभिधाना। अत्र च प्रयुज्यमाना भाषापि व्यावहारिकी जानपदैरपि सुलभावगाह्या। इतिवृत्तं कल्पितमपि नित्यजीवनसम्बद्धम्। पात्राण्यपि वर्तमानसमाजस्य प्रतीकरूपाणि। यतश्च नित्यं समाजे अनुभूयमाना एव सन्दर्भा अत्र विषयीक्रियन्ते, अतः सामान्यजनताया अपि तत्र रुचिः प्रवृद्धा। ततश्चाचिरेणैव कालेन सर्वजनामोदं प्राप्ता इयं साहित्यप्रक्रिया। इयं च प्रक्रिया विदेशेष्विव भारतेऽपि प्रत्येकस्मिन् राज्ये प्रत्येकस्यां भाषायां अल्पेनैव कालेन रूढमूला जाता। उत्तरभारते अस्याः प्रक्रियायाः *उपन्यास* शब्देन कर्णाटकेषु *कादम्बरी* शब्देन च व्यवहारः दृश्यते। आन्ध्रेषु तु *नवला* शब्देन व्यवहारः। *नवला* शब्दोऽयं न केवलं *नावल्* इति पदेन आनुपूर्व्या सदृशः, अपि तु अर्थेनापि। *नवं प्रकारं लाति गृह्णाति* इति व्युत्पत्त्या *नावल्* समानार्थत्वमपि सिद्ध्यति। अतश्चात्र इयं प्रक्रिया *नवला*

In Public domain. Digitization Muthulakshmi Research Academy
शब्देनैव मयापि व्यवहियते। प्राचीनकाले यथा *नाटकान्त कवित्वमिति* प्रथा आसीत्। तथा इदानीं *नवलान्तं कवित्वमिति* प्रथा जाता। अत एव इदानीं महाकावयः अपि अस्यां प्रक्रियायामपि बहु प्रयतन्ते। अत्र चोदाहरणभूताः क्रि.श.विंशे शतके प्रसिद्धाः *कविसाम्राट्* बिरुदेन प्रसिद्धाः आन्ध्रभाषायामैदंप्राथम्येन ज्ञानपीठपुरस्कारग्रहीतारः, पद्मभूषणाः, आन्ध्रराष्ट्रास्थानकवयः, विश्वनाथसत्यनारायणमहाभागाः। एते च संस्कृते आन्ध्रभाषायां च महाकवयः। श्रीमद्वाल्मीकिरामायाणस्यैव आन्ध्रभाषायां पद्यात्मकम् अनुवादं *रामायणकल्पवृक्षम*ाम्ना विधाय ज्ञानपीठपुरस्कारं प्राप्तवन्तः। तथैव *वेयि पडगलु* (सहस्रफणाः) इति अतिबृहत्-सहस्राधिकपृष्ठात्मिकायाः नवलायाः रचनया नवलारचयितृष्वेव अग्रगण्याः जाताः। अस्यैव अतिबृहत्याः नवलायाः भूतपूर्वप्रधानमन्त्रिभिः पि.वि.नरसिंहराव् महाभागैः हिन्द्यामनुवादः कृतः। एते च सत्यनारायणमहोदयाः संस्कृते आन्ध्रभाषायां च नैकान् ग्रन्थानरचयन्। तत्र नवलानां सङ्ख्यापि बह्वी। तेषां तादृशकृतिषु अन्यतमा *हाहाहूहूः* इति अल्पकाया *नावल्* अभिधाना कृतिः। इयं च कृतिः यद्यप्यल्पकाया तथापि अस्य महाशयस्य मेधायाः भावनाचमत्कृतेश्च निकषोपलभूता।

कालिदासः शापवशात् भुवं प्राप्तं रामगिर्याश्रमेषु अटन्तं यक्षं सृष्ट्वा तं नायिकीकृत्य मेघसन्देशं रचितवान्। यद्यपि स यक्षः एकवर्षपर्यन्तं भुवि रामगिर्याश्रमेषु सञ्चरितवान्, अथापि न कोऽपि तं दृष्टवान्, न वा तेन भाषितवान्। तथा सोऽपि केनापि मानवेन सह न भाषितवान्, न वा उषितवान्। अतः तस्य स्वरूपस्वभावादिकं न मानवैः ज्ञातः, न वा तेन मानवानां स्वभावः अवगतः। यदि च नष्टशक्तिः तादृशः एव कश्चन मनुष्यमध्ये स्याच्चेत् कथं वा स्यात्? तत्रापि सः विचित्राकृतिश्चेत् कथं भवेत? विचित्रः खल्वयं विचारः। एतादृशः कश्चन विचारः कदाचित् कविवर्यस्य मनसि समुद्भूतः यश्च *हाहाहूहूः* इति नवलारूपेण परिणतः। अत्र च नायकः न यक्षः। किन्तु अश्वमुखः भूमौ

In Public domain. Digitization Muthulakshmi Research Academy
पतितः गन्धर्वः। तत्रापि लण्डन् नगरे ट्रफलागेर् स्केर् इति प्रसिद्धे चत्वरे। पतनदिवसमारभ्य एकवर्षपर्यन्तं स तत्र अतिष्ठत्। एतन्मध्ये तत्रत्याः जनाः तं कथममन्यन्त, सोऽपि अत्रत्यानां विषये कथमचिन्तयन् इत्यादि सचमत्कारमत्रनिरूपितम्।

अस्य *हाहाहूहू* इति आन्ध्रनवलायाः संस्कृतेन अनुवादः कृतः श्रीमद्भिः किडाम्बि श्रीनिवासरामानुजाचार्यैः। अयं च प्रथमं क्रि.श.1984 तमे वर्षे अनुवादकैरेव स्वयं प्रकाशितः।

भारतीयभाषावाङ्मयपरिशीलनेन ज्ञायते यत् सर्वोपि साहित्यप्रक्रियाविशेषः प्राचीनसंस्कृतभाषासाहित्यानुवादेनैव आरब्ध इति। मूलभूते संस्कृते तु स्वयमेवोत्पन्नः। तथा च भारतीयभाषावाङ्मयस्य सर्वस्यापि मूलभूतं संस्कृतवाङ्मयमेवेति संस्कृतसाहित्यानुवादेनैव तत्तद्भारतीयभाषावाङ्मयम् आरब्धमिति च सर्वं विदितम्। नवलासाहित्यं तु न तथा। एतच्च पाश्चात्यनवलासाहित्यस्य अनुकरणरूपतयैव भारतीयभाषावाङ्मयेषु प्रविष्टम्। यद्यपि संस्कृते प्रसिद्धानि कादम्बर्यादिगद्याकाव्यानि अस्यां प्रक्रियायामन्तर्भवन्तीति केचिन्मन्येरन्, अथापि भाषेतिवृत्तादिभिः तेभ्यः विलक्षणमेवेदं नवलासाहित्यम्। संस्कृते प्रक्रियेयं नूतना विश्वे वर्तमानतत्तद्भाषानलासाहित्यनुवादरुपेण अनुकरणरूपेण वा इदमिदानीमुत्पन्ना। अस्याश्च प्रक्रियायाः आरम्भः अनेन *हाहाहूहू* अनुवादेनैव जात इत्यूह्यते। यावत्यः नवलाः मया संस्कृते अवलोकिताः तासु इयमेव प्रथमतया दरीदृश्यते। या च क्रि.श. 1984 तमे पर्ष प्राकाशिता। ततः परमेव अनेकाः नवलाः तत्तद्भाषासु प्रसिद्धानां नवलानामनुवादरूपाः अनकरणरूपाः स्वतन्त्रा वा समुद्भूताः यदर्थं साहित्य-अकादमीसंस्थया पुरस्कारोऽपि प्रतिवर्षम् उत्तमत्वेन परिगणितायाः प्रदीयमानोप्यस्ति।

नवलायां भाषाविषये स्वरूपविषये रचनाविषये वा कोऽपि नियमः नर्बन्धो वा नास्ति। अतः अत्रत्या भाषा समकालिकव्यावहारिकस्वरूपा

In Public domain. Digitization Muthulakshmi Research Academy

तत्तद्भाषागतविलक्षणजातीयप्रयोगबन्धुरा भवति। माण्डलिकाः जातीयाश्च वाक्यखण्डरूपाः लोकोक्तिरूपाश्च विशिष्टार्थबोधकाः बहुलतया प्रयुज्यन्ते येषां साक्षादनुवादोऽपि क्लिष्टः। किञ्च व्यावहारिकभाषायां यथेच्छं भवति अन्यभाषापदप्रयोगः। तानि अन्यभाषापदानि तथा तत्तद्वस्तुविशेषवाचकपदानि च तत्र प्रयुक्तानि कथमनुवदनीयानीत्यपि महती समस्या। किञ्च तस्याः तस्याः भाषायाः भवति काचित् विशिष्टा शैली, यया प्रस्तुतः सामान्योऽपि विषयो भवति हृदयङ्गमः। स एव यथातथमन्यस्यां भाषायामनूदितश्चेत् नीरस इव भवति। अतः भाषान्तरानुवादः न सुलभसाध्यः। यस्य च व्यक्तिविशेषस्य द्वे अपि भाषे मातृभाषातुल्ये स एव एकस्याः अन्यस्याम् अनुवदितुं समर्थः। अथ अन्यभाषानुवादापेक्षया संस्कृतेन अनुवादः बहुप्रयत्नसाध्यो भवति। अन्यस्यां भाषायामनूदितस्य पाठकाः केवलं तत्तत्प्रान्तवासिनः अनुवादकस्यैव भाषा येषां मातृभाषापि भवति। अतस्तत्र भाषाप्रयोगविषये काठिन्यं न भवेत्। संस्कृतभषायामनूदितस्य तु पाठकाः नैकस्य प्रान्तस्य देशस्य वा परिमिताः। अतो ह्यनुवादकस्य प्रयासः तथा भवेत् येनायमनुवादः विश्वे कुत्रापि स्थितेन संस्कृतज्ञेन अवगतः भवेत्। अतश्च संस्कृतस्य या सहजा शैली सा उक्तानुवादे आश्रयणीया स्यात्। अनुवादसमये अवश्यमेव अनुवादकस्य मातृभाषाप्रभावः अनुवादे भवेत्, यश्च अन्यमातृभाषीयाणाम् अवगमने अवरोधको भवति। अतश्च संस्कृतेनानुवादकेन तथा जाकरूकेण भाव्यं यथा स्वीये अनुवादे स्वमातृभाषाप्रभावः ईषदपि न भवेत्। स्याद्वा अल्पशः सः अन्येषाम् अवगाहने अवरोधकः न भवेत्। अत एवेदानीमनुवादेषु बहुषु सत्स्वपि केचिदपि समेषां संस्कृतज्ञानां पाठकानामादरपात्राणि भवन्ति। तादृशेषु सर्वसंस्कृतज्ञादरपात्रभूतोयमनुवादः *हाहाहूहूः* इति निश्चयेन शक्यते वक्तुम्।

अथेदानीमनुवादकान् सङ्क्षेपेण परिचाययामि। किडाम्बि श्रीनिवासरामानुजाचार्याः क्रि.श.1930 तमे वर्षे तिरुपतौ आविर्भूताः। माता श्रीमती जानकम्मा। पितरः उभयवेदान्तविद्वदग्रेसराः वैयाकरणपञ्चमनाः

In Public domain. Digitization Muthulakshmi Research Academy

वेङ्कटनरसिंहाचार्य स्वामिनः। विद्याभ्यासः नेल्लुरुनगरे। अध्यात्मगुरवःपितृपादाः। क्रि.श.1960 तमे वर्षे नेल्लूरु वेदसंस्कृतकलाशालायामध्यापकत्वेन प्रविष्टाः, षोडशवर्षाणि व्याख्यातृत्वेन, ततः चतुर्दशवर्षाणि कलाशालाध्यक्षत्वेन च कार्यं निकाह्य क्रि.श.1990 तमे वर्षे निवृत्ताः। साहित्यं प्रधानं शास्त्रं चेदपि व्याकरणे, उभयवेदान्तयोः अपि निष्णाताः एते संस्कृते सरससरलरचनाधुरंधराः। शुकसन्देशः सन्देशकाव्यं, सौगतम् (बुद्धचरिते कश्चनघट्टः), निद्राविभूतिः अनेकानि स्तोत्राणि च एतेषां काव्यरचनावैदग्ध्यं प्रकाशयन्ति। आन्ध्रभाषायां भूतपूर्वान्ध्रराष्ट्रमुख्यमन्त्रिणां बेजवाडगोपालरेड्डि महोदयानां "स्वप्नमु-नेडु" इति कविताद्वयस्य "उल्लेखमञ्जरी" नाम्ना, "गुलिस्थान्" इति नाम्नः सौदीकवितासम्पुटस्य "सुभाषितपुष्पवाटिका" नाम्ना, हाहाहूहूनवलायाश्च अनुवादाः परिगणनीयाः। सेवानिवृत्तेरनन्तरं एते उभयवेदान्तसभायाः अध्यक्षाः भूत्वा रामानुजदर्शनस्य प्रचाराय बद्धदीक्षाः सरलान्ध्रभाषायां अनेकेषां दार्शनिकग्रन्थानां व्याख्यामरचयन्। एते च तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन क्रि.श.1999 तमे वर्षे विद्यावाचस्पति गौरवोपाधिना, उभयवेदान्तसभया उभयवेदान्तवाचस्पति बिरुदेन, क्रि.श.2000 तमे वर्षे श्री त्रिदण्डिचिन्नजीयर् स्वमिभिः गोपालोपायनेन च सत्कृताः सहृदयतल्लजाः आत्मगुण परिपूर्णाश्च आसन्। एते च स्वीये अशीतितमे वयसि तद्विष्णोः परमं पदं प्राप्नुयुः।

एतेषां चतस्रः पुत्र्यःएकः पुत्रश्चासन्। पुत्रोऽपि संस्कृतज्ञः मेधावी विनीतश्चासीत्। परन्तु विधिवशात् स्वीये द्वात्रिंशे वयस्येव परमपदं प्राप। तेन दुःखेन पीडिताः एते तस्य स्मृतावेव अमुमनुवादं कृत्वा तस्यैवाङ्कितमकुर्वन्। एते च महानुभावाः मम प्रजावत्याः भ्रातरः (ज्येष्ठपितृव्यपुत्राः)। मयि अत्यन्तं स्निग्धाः आसन्। एतेषामनुजैः अनुजकल्पैश्च प्रकल्पिता उभयवेदान्तसभा। एतैः प्रदर्शिते एव मार्गे कार्यं साधयन्ती राराजते। एतेषामस्य हाहाहूहूः इत्यस्य यद्यपि पूर्वं प्रकाशनमासीत् तथापि अपेक्षानुगुणं तस्य प्रचारः नासीत्।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिकृतयोपीदानीं न लभ्यन्ते। अतोऽस्य अकादमीद्वारा प्रकाशनं भवत्विति प्रस्तावः यदा मया संस्कृत-अकादम्याः विद्वत्परिषदि विहितः तदा सर्वैरपि सदस्यैः सायोदं स्वीकृतिर्दत्ता, तथा उभयवेदान्तसभयापि एतत्प्रकाशनार्थमनुमतिर्दत्ता। अतः अस्मिन्नवसरे सर्वेभ्यो अकादमीविद्वत्परिषत्सदस्येभ्यः मदीयं हार्दं कार्तज्ञं निवेदयामि। विशेषतः प्रस्तावममुं सपदि कार्यान्वितं कृतवद्भ्यः निदेशकेभ्यः डा. श्रीनिवास वरखेडिमहोदयेभ्यः साभिनन्दनं हार्दं कार्तज्ञं निवेदयामि। तथा उपनिदेशकाय मच्छिष्याग्रगण्याय सुब्रह्मण्याय साभिनन्दनम् आशिषः प्रदीयन्ते। एतत्प्रकाशयितुमनुमतिं दत्तवद्भ्यः उभयवेदान्तसभासदस्येभ्यः सर्वेभ्यः, विशिष्य कार्यदर्शिभ्यः रामानुजाचार्येभ्यश्च धन्यवादाः वितीर्यन्ते। अन्ते च पुनरेकवारं सर्वेभ्यः एतत्कार्यसम्बद्धेभ्यः सादरधन्यवादप्रकाशनपुरस्सरमिमां वाचमुपसंहरामि।

इत्थं

विद्वज्जनविधेयः

कं.वें.रामकृष्णमाचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमप्रकाशने अनुवादकस्य निवेदनम्

आन्ध्रप्रदेशास्थानकवीश्वरैः कविसम्राडित्यन्वर्थबिरुदभाग्भिः ज्ञानपीठसम्मानितैः श्री विश्वनाथसत्यनारायणमहोदयैः विरचितायाः "हाहाहूहू" नामक-आन्ध्रनवलाकृतेः परिवर्तनमिदं संस्कृते।

हाहाः हूहूः इति प्रसिद्धौ द्वावेतौ गन्धर्वौ देवसभायाम्। परन्तु अत्र हाहाहूहूः इति एकस्यैव गन्धर्वस्य नाम, शिवरामः, रामकृष्णः इत्यादिवत्। एतच्छताब्दीयप्रथमपादस्थितेन (क्रीश 1863- 1918) दत्तात्रेयकविना विरचिते गङ्गागुणादर्शचम्पूकाव्ये हाहाः हूहूः इत्येतौ गन्धर्वौ गङ्गायाः गुणदोषौ वर्णयतः।

एकदा आकाशमार्गेण गच्छन् हाहाहूहूनामा कश्चन गन्धर्वः प्रमादवशात् लणडन् नगरे न्यपतत् इति कथासन्निवेशं परिकल्प्य, ततः तं विलोकितवन्तः पाश्चात्याः तमधिकृत्य किममन्यन्त कथञ्च तेन सह व्यवाहरन्, स च गन्धर्वः तान् कथं व्यभावयत्, अन्ते किमासीत् इत्ययं कथांशः अस्यां "हाहाहूहू" नामकृतौ सम्यक् प्रपञ्चितः।

कथेयं नातिविस्तृता हृदयङ्गमा विलक्षणगन्धर्वसम्बन्धिनी चेति कृत्वा गैर्वाण्यां परिवर्तयितुं कृतसङ्कल्पः श्रीमतां विश्वनाथसत्यनारायण-महोदयानामनुज्ञामुपलभ्य यथोचितं पर्यवर्तयम्। ततः सहृदयाः सविनयं प्रार्थ्यन्ते परिवर्तनेऽस्मिन् गुणदोषयोरावेदनाय। हेम्नस्संलक्ष्यते ह्यग्नौ विशुद्धिश्श्यामिकापि वा। निबन्धमिमं संस्कृतभाषायामनूद्य प्रकाशयितुं सर्वानधिकारान् मह्यमनुगृहीतवद्भ्यः अधुना कीर्तिमूर्तिभ्यः विश्वविख्यातवैदुष्येभ्यः श्रीविश्वनाथसत्यनारायणमहोदयेभ्यः प्रणामाञ्जलिं बध्नामि, मुखपत्रचित्रणेन ग्रन्थमिमलङ्कृतवते प्रियसुहृदे श्रीमते अमृतवाक्कुल शेषकुमाराय (Lecturer, V.S.College, Nellore) मुद्रणसमये शोधनकार्यं सम्यक् निर्वर्त्य ग्रन्थमिमं परिष्कृतवते अन्तेवासिने सृहृन्मणये च श्रीसूरं श्रीनिवासाय (Principal. S G.K.O. College, Tadikonda Guntur Dt.) च सर्वथा कृतज्ञोऽस्मि।

इति निवेदयिता सहृदयवशंवदः

April 1984 K.S.रामानुजाचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

हाहाहूहूः

1

एकस्मिन् दिने प्रातः लण्डन् नगरे ट्रेफाल्गर् स्केर् प्रान्ते जनाः बृन्दं बृन्दं समापत्य कमपि विचित्रजन्तुमवलोकयन्ति स्म। सः जन्तुः तान् सर्वथापि आचकर्ष। सः आकण्ठं मानवः शिरसा तु तुरङ्गमः। सटाः, उत्तम्भितौ कर्णौ, अर्धावदृश्यमानघरट्टसदृशीं दन्तपङ्क्तिञ्च सः वहति। तस्य मुखे तिलकमस्ति। तच्च ऊर्ध्वरेखाञ्चितम्। तस्य जन्तोरन्ये अवयवास्सर्वेऽपि मनुष्यावयवसजातीया एव। यथा द्वौ हस्तौ द्वौ च पादौ इत्येव। पादयोः कटके स्तः। ते स्वर्णमये पित्तलमये वेति न ज्ञायते। परन्तु तयोः छाया पीतवर्णा। ते कटके इत्यतोऽपि मञ्जीरे इति कथनं युक्तम्। पादाङ्गुलीनां रत्नखचितानि अङ्गुलीयकानि विद्यन्ते। हस्ताङ्गुलीनां दशानामपि दशाङ्गुलीयकानि सन्ति। प्रकोष्ठयोः सिंहमुखाञ्चिते वलये स्तः। बाहुमध्येऽप्याभरणालङ्कृते। भुजयोः केयूरे स्तः। शिरसि किरीटमस्ति। स जन्तुः किं मृतः आहोस्विन्मूर्छितः इति न ज्ञायते। स किं मनुष्यः उत जन्तुः इत्यपि न ज्ञायते। प्रायशः निद्राणः स्यात्। पार्श्वेनैकेन स शेते। क्षौमं वस्त्रं पर्यधत्त। सुविस्तृतं स्वर्णसूत्राञ्चितमुत्तरीयमाच्छिन्नं तत्समीपे अधः पतितमास्ते। तद्भुजपश्चाद्भागयोः द्वे सुदीर्घे क्षते दृश्येते। ताभ्यां क्षताभ्यां ततः पूर्वं कियत् रक्तं सुस्रावेति न परिज्ञायते। किन्तु किञ्चिदिव रक्तं भूमौ घनीभूतमास्ते।

तेन रक्तेन किञ्चिद्दूरे पतितमुत्तरीयं सिक्तमभवत्। निदाघसमयेऽपि लण्डन् नगरे किञ्चिदिव हिमं पतत्येव। अतः तेन हिमेन तद्रक्तं न प्रवहतीव।

स जन्तुः देहप्रमाणेन अत्यन्तमुच्छ्रितः। प्रायशः मनुष्याः पञ्चषपदोन्नताः भवन्ति। स तु अष्टपदोन्नतः स्यात्। तस्य वक्षः स्थलमस्मदीयव्यामप्रमितं भवति। जनास्सर्वेऽपि तं दूरादेव विलोकयन्ति स्म। क्षणात् क्षणं जनानामागमनं प्रवर्धते। ते बहुधा वक्तुमारभन्त। कश्चन ग्रीक्भाषापण्डितः प्राह "सिथियस्

In Public domain. Digitization Muthulakshmi Research Academy

नामकः ग्रीक्नायकः मिनिटार्नामकं कमपि वृषभमुखं जन्तुं जघान। अयमपि तादृश एव जन्तुः स्यात्" इति। आफ्रिकादक्षिणामेरिकाराज्येषु बहुविधान् जन्तून् विलोक्य तेषु कांश्चन लण्डन्मृगशालां प्रापितवान् कश्चन महामृगयुः एवमवदत् – शरीरं मनुष्यस्य मुखं तुरङ्गस्य च वहन् कश्चन जन्तुः आफ्रिकारण्येषु क्वाप्यस्तीति अहमशृणवम्। परन्तु तदा तन्न व्यश्वसम् इति। अनुपदमेव सः स्वमनसि यद्ययं जन्तुः मया अलप्स्यत तदा लण्डन्मृगशालां प्रति एतत् प्रापणभाग्यं ममाभविष्यत्। ईदृशं जन्तुमानीतवता मया बहुमतिरपि अलप्स्यत। अद्य तु स लाभः अपगतः इति विचिन्त्य दीनवदनः अभूत्। निश्चेष्टं पतितं तं जन्तुं समया साहसेन गच्छतः बालकान् तदीयमातरः पश्चादाकर्षन्ति स्म।

अयं मृग एव। परन्तु अस्य वस्त्राणि कुत आयातानि। अस्य आभरणानि च कुतः इति केचिदपृच्छन्। अन्ये "सत्यमेवैतत्" इत्याहुः। यदि नायं मृगः तर्हि को वा भवेदिति प्रश्नः उदजनि।

अन्यः कश्चित्प्राह – अयं मृग एव। एनं कोप्यमेरिकादेशीयः प्रेञ्चिदेशीयो वा आप्रिकारण्येषु अन्यत्र वा कुत्रचित् गृहीतवान् स्यात्। तस्मिन् विमानेन एनं स्वदेशं नयति, जन्तुरयं अधः पतितः स्यात्। अधः पतनेन मृतोऽपि स्यात्। तदा शीर्षं भग्नमभवदिव। अत एव तद्रक्तं तथा स्रवति इति। अन्यः कश्चित् तर्हि अस्य मृगस्य इमानि वस्त्राणि कुतः आगतानि। चीवरखण्डस्यैकस्य परिधानम्, अन्यस्य उपरि धारणञ्च किमेतत्। कीदृशमिदं वस्त्रधारणम्। यदि धर्तव्यं यामकोटके (Pant, Coat) धर्तव्ये। वस्त्रखण्डानि के वा धरन्ति इत्याह। अपरः भारतदेशे एवमेव वस्त्राणि धरन्ति किल इत्यकथयत्। अन्यः कश्चन ध्वनिः एवमश्रूयत – भारतदेशीयैः कैश्चिदयं मृगः पोषितः स्यादिति।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वामप्याङ्ग्लेयतां मुखेन समुद्वमन् कश्चित् भारतदेशे मनुष्या एव मृगाः। तेषामन्यमृगसंवर्धनं किमर्थम् इत्याचिक्षेप। सर्वेऽपि जहसुः। अपरः प्राह – भारतीयाः आफ्रिकारण्यानि दक्षिणामेरिकारण्यानि वा मृगयायै न गच्छन्ति। प्रभुत्वं तेषु मृगयायै तान् नानुमनुते। अतः मृगमिमं भारतीयाः जगृहुरितीदं न सत्यम्। तैः पोषितः इत्येतदपि असत्यमेव इति। तर्हि कथमयं मृगः भारतीय इव वस्त्रं पर्यधत्त इति प्रश्नः उदियाय। तस्य कश्चन बुद्धिमान् एवं समाधानमदात् – मृगमेनं गृहीत्वा स व्याधः भारतदेशे कञ्चित्कालमुषितवान् स्यात्। सः वैचित्र्याय वेषमिममस्मै परिकल्पितवानपि स्यात् इति। समाधानमिदं युक्तमिवाभात्। सर्वेऽपि तमत्यन्तमभ्यनन्दन्। मृगोऽयं निद्रातीव। उच्चैः मा शब्दः क्रियताम्। उपद्रवः भविष्यति इति केचन जनान् निश्शब्दमवस्थानाय समज्ञापयन्।

अन्यः कश्चित्तर्हि अस्य मृगस्य शरीरे इयन्ति आभरणानि कुतः आगतानि इमान्यतिमूल्यवन्ति किल इत्यपृच्छत्। तद्वचनं नकोऽपि शुश्राव। जनसमूहे कोलाहलः अप्यशेत। मृगः मृत इति केचित् जीवतीति केचिच्च कथयन्ति। यदि मृगः उत्थास्यति तर्हि प्रमादः (Danger) भविष्यतीति सर्वे बिभ्यति। परन्तु तं विचित्रं जन्तुं विहाय न कोऽपि ततो निर्जगाम।

वीथीषु शकटादिसञ्चारः यथायथं निरुद्धोऽभूत् कारणञ्चास्य जनानां तत्र तथा व्यूहनमेव। अथ वार्तेयं लण्डन् नगरे सर्वत्र व्याप्नोत्। पुरप्रमुखाः नगराध्यक्षः, मताचार्याश्च समाजग्मुः। स्काट्ल्याण्ड्याई् वासिनः सर्वेऽपि समापतन्। तं मृगं परितः विंशतिभुजाभ्यन्तरे (Yards) नलिकाभिः (Pistols) सन्नद्धान् रक्षकभटान् निवेश्य नगराध्यक्षः कैश्चित् मुख्यैस्सह तमभ्यसर्पत्। तेषां हस्तेष्वपि निमेषमात्रेण तं मृगं दग्धुं समर्थाः नलिकाः सुसज्जितास्सन्ति। रक्षकभटाः जनान् ततस्ततः निस्सारयन्ति स्म। ततः पूर्वे जनाः तस्य जन्तोः अत्यन्तं समीपं जग्मुः। केचित्तु विनैव नलिकाः तं जन्तुमुपसृत्य तत्स्वरूपं सर्वं पर्यशीलयन्। तथापि अधिकारिणः स्वकर्तव्यं यथाविधि निर्वर्तयितुमारभन्त।

In Public domain. Digitization Muthulakshmi Research Academy

नलिकाः गृहीत्वा प्रधानपुरुषेषु तिष्ठत्सु कश्चनोद्योगी मृतस्य मृगस्य समीपं गत्वा पर्यशीलयत्। स मृगः मृतो वा सजीवो वेति ज्ञातुं वैद्येभ्यः प्रैषयन्। सुदृढाः आयसशृङ्खलाः आनाय्य ताभिः तस्य जन्तोः पाणिपादं न्यगलयन्। तेन स जन्तुः प्रबुद्धोऽपि किमपि कर्तुं न प्रभविष्यति। तदनु वैद्याः समागत्य तं परीक्षितवन्तः। पार्श्वयोरुभयोरपि तं चिरं परीक्ष्य "नायं मृतः, जीवतीत्यपि वक्तुं न शक्यते। उच्छ्वासनिःश्वासौ न प्रचलतः। हृदये स्पन्दनं नास्ति। अथापि हृदयं शब्दायत इव। नाडी न स्पन्दते। अथापि रक्तं न शीतलं सञ्जातम्। एतदीयशरीरतत्त्वस्य अस्मदीयवैद्यसूत्राणाम् च न कोऽपि सम्बन्धः प्रतिभाति। अस्य जन्तोश्शरीरम् अस्मिन् लोके विद्यमानानां प्राणिनां शरीरैः न सालक्षण्यं वहति। अयमेतल्लोकीयोऽपि न भवितुमर्हति" इति निरचिन्वन्।

निश्चयोऽयं तत्तन्मुखेन जनसामान्ये व्याप्तोऽभूत्। श्रुत्वैतत्ते पर्यहसन्। आफ्रिकातः बहून् विचित्रजन्तून् लण्डन् मृगशालां प्रापितवान् कश्चन जन्तुशास्त्रज्ञः मिन्त्र डिकेनसनः वैद्यान् पर्यहसत्। "अहमेव चेत् तस्य जन्तोः तत्वं क्षणेन निश्चितवान् स्याम्" इति च प्राह। तं जन्तुं ते सर्वथा पर्यैक्षन्त। तदीयभुजपश्चाद्भागयोः द्वे सुदीर्घे क्षते कुतः सञ्जाते इति तैः नाज्ञायत। कस्मादपि विमानादयं पतितः स्यात् इति तु निर्धारितमभवत्। तथापतनमपि रात्रौ यदा कदापि सञ्जातं स्यात्। विमानादधःपतनसमये अयं पश्चात्तनीकृताभ्यां हस्ताभ्यां किमपि निशितं प्रहरणं गृहीतवान् भवेत्। तेनास्य भुजपश्चाद्भागयोः क्षते सञ्जाते भवेताम् इति च व्यभावयन्। यद्ययं जन्तुः तथा विमानात् पतितः तर्हि एतच्छरीरे अन्यत्र कुत्रापि कुतः घाताः नाभवन् इति केचित्पप्रच्छुः।

तस्य जन्तोः शरीरात् सर्वाण्यप्याभरणानि अपनिन्युः। तेषां नामानि सङ्ख्याश्च विलिख्य रक्षकभटकार्यालये तानि न्यक्षिपन्।

ते वैद्याः तयोः क्षतयोः चिकित्सां कृत्वा अबध्नन्। सुमहति समये व्यतीतेऽपि स मृगः नैव चचाल। तदुपरि विद्यमानं वस्त्रं पर्यशीलयन्।

In Public domain. Digitization Muthulakshmi Research Academy

तादृशमतिसूक्ष्मं सुकुमारं च वस्त्रं कस्मिन् देशे वयन्तीति ते नाजानन्। ढक्का मजिलिन् इति प्रसिद्धानि वस्त्राण्यपि एवं सूक्ष्माणि भवन्ति नवेति न जानीमः। न केवलं तदसामान्यं वस्त्रम्। किन्तु स्वर्णतन्तुव्यूतमपि। स्वर्णतन्तूनां सौन्दर्यं वर्णयितुं न शक्यते। तस्य वस्त्रस्याञ्चलानि सान्ध्यरागवत्पुष्पराज (roja flower) सवर्णतन्तुभिः व्यूतानि। तद्वस्त्रं प्रेक्षकान् विस्मापयति।

तं जन्तुं शतं सेवका समुत्थाप्य एकं लारी (lorry) शकटमध्यारोपयन्। स जन्तुः रक्षकभटकार्यालयं प्रति नेयो वा मृगप्रदर्शनशालां प्रति नेयो वेति संशयः सञ्जातः। मृगशालाधिकारी जन्तुरयमस्मदीयः इत्यवदत्। नगराध्यक्षः मृगस्यास्य प्रबोधानन्तरम् एतदीयगुणान् परीक्ष्यैव अयं क इति निर्णेतुं शक्यते। नान्यथा इति प्रोवाच। स्काट्ल्याण्ड्याई प्रान्ते दशबाहुविस्तारः दशभुजायामः पञ्चदशपदोन्नतश्च द्रढिष्ठ आयसः कूटयन्त्रः कश्चन निरमायि। तत्र स मृगः निक्षिप्तोऽभूत्। तं कूटयन्त्रं परितः सुसन्नद्धनलिकाहस्ताः शतं रक्षकभटाः रक्षणाय न्ययुज्यन्त। अथ सूर्यः अस्तं जगाम। तस्य जन्तोस्समीपे दशवैद्याः समुपाविशन्। उद्बोधानन्तरमस्य जन्तोः आहारः कः इति तेषां विचिकित्सा बभूव। कुल्माषाः, घासः, पूरिकाः, मद्यम् इत्येवमादिकं सर्वं तत्र सज्जितमभूत्। तस्य जन्तोः प्रबोधाय सर्वे प्रतीक्षन्ते स्म।

2

अथ स जन्तुः पञ्चदशदिनेभ्यः अनन्तरं चलितुमारेभे। अनुदिनं तं मृगं द्रष्टुं यूरप् देशात् ईङ्लाण्ड् देशे सर्वतश्च जनाः महोत्सवायेव समागत्य तं विलोक्य गच्छन्ति स्म। एवं नवं नवं समागच्छतां जनानां कृते लण्डन् नगरे विद्यमानाः भोजनशालाः न पर्याप्ताः अभवन्। नगरे सर्वत्र जनः नीरन्ध्रं किटकिटायते स्म।

एवं स्थिते स जन्तुः इतस्ततः पर्यवर्तत। तत्परिवृत्तिवार्ता क्षणेनैव लण्डन् नगरे सर्वत्र व्याप्नोत्। आयसकूटयन्त्रं परितः सैनिकाः नलिकाः

In Public domain. Digitization Muthulakshmi Research Academy

सज्जीकृत्य तिष्ठन्ति स्म। तस्य मृगस्य ते क्षते तैः औषधैः न शेमतुः। जन्तुः प्रबोधमध्यगच्छत्। बाहू पादौ च प्रसार्य शरीरं व्यायतीकृत्य इतस्ततः परिवृत्य नेत्रे उदमीलयत्। अनुपदमेव सैनिकाः अत्यन्तं जागरूकताम् अवालम्बन्त। स जन्तुः नेत्रे उन्मील्य स्वं परितः अपश्यत्। आश्चर्यविद्ध इव इतस्ततः पर्यशीलयत्। उत्थाय समुपाविशत्। उत्प्लुत्य चोदतिष्ठत्। "किं गदोम्हि" (किं गतोस्मि) इति उच्चैराजुघोष। समीपवर्तिभिः स घोषः सुस्पष्टं न श्रुतः। अश्वस्य हेषेवाश्रूयत। परन्तु द्विशतभुजाभ्यन्तरदूरे स्थाने विद्यमानैः तस्मिन् वर्णाः सुस्पष्टं श्रुताः। अथापि सा भाषेति को जानाति। यदि सा भाषा तर्हि का वा स्यात्। अथ च स जन्तुः कां भाषां वेत्ति? तेषां मनस्सु सा भाषेति ऊहैव न समजनि। दूरे स्थित्वा तद्भाषणे वर्णान् श्रुतवन्तः विस्मयं प्रापुः। तदात्वे अहनि यामद्वयं व्यतीतम्। स मृगः स्वं परितः आयसकूटयन्त्रं विलोक्य उच्चैः अहेषत। सा हेषा तस्य हास इवादृश्यत। किन्तु अनुपदमेव तदीयनेत्रयोः दुःखच्छाया व्यलोकि। स बाधया भूमौ निपत्य लुठन्निव आजुघोष। स घोषः दूरस्थैः "अम्हो मे अधण्णत्तइं। किमद्दि। किं सयादिट्ठो" (अहो मे अधन्यत्वम् किमेतत् किं समादिष्टः) इतीवाश्रूयत। समीपस्थाः रक्षकभटाः सैनिकाश्च अश्वः चित्रविचित्रविधया हेषते इत्यमन्यन्त। तेषु केचन प्रवयसः मृगस्यास्य तत्वमेतावता ज्ञातुं न शक्यते इत्यब्रुवन्।

अथ कतिपयनिमेषानन्तरं पुनस्स जन्तुः समुत्थायोपविश्य जनानपश्यत्। सम्प्रति नास्ति तस्य तादृशो विस्मयः तेषां दर्शने। अत्रान्तरे तत्रत्याः अधिकारिणः आहारपदार्थानानाय्य तत्समीपं प्रापयन्। स जन्तुः तान् अपश्यत्। तेषु पूरिकाः कुल्माषाः वङ्गकन्दाः एवमादय आसान्। ते के इति स जन्तुः तान् नाजानात्। अत्रान्तरे कानिचन फलान्यानाय्य तत्पुरतः न्यक्षिपन्। तानि फलानीति तेषां दर्शनानुपदमेव सः प्रत्यभिजज्ञे। तेष्वेकं फलं हस्तेन जग्राह। सर्वे सः फलं भक्षयिष्यतीति व्यभावयन्। किन्तु सः तत्फलं त्रोटयित्वा

In Public domain. Digitization Muthulakshmi Research Academy

परिशील्य पार्श्व एव न्यक्षिपत्। "पञ्चदश दिनेभ्यः अस्य नास्त्याहारः। तत्कथमयं फलं न खादति" इति केचित्। तादृशजन्तोः क्षुधाशान्तये तत्फलं कथमलं भवेदिति केचित्। विचित्रमेतत् यदश्वः फलं भक्षयतीति केचिच्च विसिष्मियिरे। स जन्तुः क्षणं किमप्यालोच्य आयसकूटयन्त्रात् बहिस्तिष्ठन्तं कञ्चन पुरुषं स्वसमीपागमनाय हस्तेन संज्ञापयामास। सः तत्समीपं जगाम। जन्तुरहेषत। हेषाध्वनिः "कोणु तुमं" (कोनुत्वं) इतीव दूरस्थैः अश्रूयत। तेन स जन्तुः किमपि भाषते इति सर्वे व्यभावयन्। किन्तु किं भाषते इति नाजानन्। अस्य भाषणं कथं स्यात् इति सर्वेऽपि अत्यन्तं विस्मिताः आसन्।

स्वोक्तं तेन पुरुषेण न ज्ञातमिति मृगः अजानात्। सः किञ्चिदिव विचिन्त्य बाहू समुत्क्षिप्य शिरसि जलसेकमभिनिनाय। न कोऽपि किमप्यजानात्। प्रेक्षकेषु कश्चन भारतदेशीयोऽप्यासीत्। स प्राह – जन्तुः स्नातुकाम इव इति। वार्तेयं क्षणेन नगराध्यक्षस्य श्रुतिपथमगात्। सत्यमेव तदिति सः निरचिनोत्। परन्तु तस्य स्नापनं कथम्। कियज्जलं पर्याप्तं भविष्यति। पादौ हस्तौ च बद्ध्वा तं मृगं थेम्स् नदीं नेतुं केचिदैच्छन्। तथाकरणं प्रमादावहम्। कदाचिदयं मार्गे जनानामुपरि निपत्य तान् मारयेदपीति परे प्राहुः। अन्ते नैवमिति विचिन्त्य यान्त्रिकजलनालिकाभिः तमस्नापयन्। स जन्तुः नखशिखपर्यन्तम् अभ्यषिच्यत। कूटयन्त्रे अधःप्रदेशस्सर्वोऽपि पङ्किलः आसीत्। तदा स जन्तुः स्वीयमुत्तरीयं निष्पीड्य स्व शरीरं निर्ममार्ज। तदनु तदुत्तरीयं धृत्वा अधरीयं निष्पीड्य आयसशलाकासु शोषणाय न्यबध्नात्। सर्वमप्येतत् पश्यन्तः जनाः अतिवेलं व्यवर्धन्त। तेषां विस्मयस्य नास्त्यवधिः। अधः प्रदेशः सर्वोऽपि पङ्किलः। अतः उपवेष्टुं नास्त्यवकाशः इति सः समज्ञापयत्। तद्विज्ञाय महाफलकमेकं समानाय्य कूटयन्त्रान्तर्न्यधापयन्। स जन्तुः तस्मिन् फलके पद्मासनेनोपविश्य प्राणानायम्य किमपि ध्यातुमारेभे। परितः स्थितैः किमेतदिति न ज्ञातमासीत्। सार्धघटिकाद्वयानन्तरं सः नेत्रे उदमीलयत्। उत्थाय शुष्कमधरीयं

In Public domain. Digitization Muthulakshmi Research Academy

पर्यधत्त। तावत्पर्यन्तं धृतमुत्तरीयं तदापि किञ्चिदिव आर्द्रमिति कृत्वा शोषणाय बबन्ध। फलानि निदर्श्य ईदृशान्यानाययत इति विज्ञापयापास। अनुपदमेव नगराध्यक्षः सेवकान् प्रेषयित्वा प्रसेव (basket) पूरं फलान्यानाययत्। अथ पात्रमेकमावश्यकमिति सः समज्ञापयत्। एकं पात्रं समानायि। तत्पात्रं गृहीत्वा स मृगः तानि फलानि तीर्थेन प्रोक्ष्य किमप्यस्फुटमुच्चरन् फलानामुपरि हस्तौ परिभ्राम्य प्रसेवस्थानि फलानि सर्वाण्यभक्षयत्। जलमावश्यकमिति हस्तेन न्यदर्शयत्। पुनः जलनालिकाभिः जलं प्रासारयन्। स जन्तुः तत्तीर्थमुदरपूरमपिबत्।

पश्चात् तस्मिन् फलके समुपविश्य चतसृषु दिक्षु स्थितान् सर्वान् पर्यशीलयत्। क्षणं परिशील्य पर्यहसत्। तदा जनाः स जन्तुः तथा हसतीत्यजानन्। मृगः आयसशालाकाः प्रदर्श्य एताः किमर्थमिति इव पप्रच्छ। सर्वेऽपि आश्चर्यमग्नाः आसन्। केचिदवदन् – "नायं मृगः। मनुष्य एव। शिरस्तु केवलमश्वस्य वहति। अस्माभिः बहूनि खण्डानि उपज्ञातानि। परन्तु ईदृशमनुष्याणां निवासस्थानं तत्खण्डं नोपज्ञातम्। अतः अनेन भाष्यमाणा भाषा का इति विचिन्तनीयम्। अस्य देशः क इति च ज्ञातव्यम्। अयं न जन्तुः। किन्तु नागरकजात्यश्च। ईदृशमिमं परितः शलाकाः किमर्थम्। आसामपनयनमेव युज्यते" इति। अधिकारिणस्तु "आयसकूटयन्त्रमपनेतुं न शक्यते। नायं जन्तुरिति कथं विश्वसितुं शक्यते। जनानामुपरि निपत्य हनिष्यति चेत् किं करिष्यामः" इति प्राहुः। अतः आयसशलाकाः नापनीताः। परितः स्थिताः अधिकारिणः आङ्ग्लभाषया बहून् विषयान् तस्मै प्रोचुः। सा भाषा तेन जन्तुना नाबुध्यत। अतस्ते प्रेञ्च्, जर्मन्, इटालियन्, रष्यन् प्रभृति भाषाभिः क्रमेण समभाषन्त। स जन्तुः ता अपि न वेद। कञ्चन नीग्रोजातीय माहूय तेन नीग्रोभाषया अभाषयन्। तास्सर्वा अपि भाषाः श्रुत्वा स जन्तुः परिहसन्निव जहास।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वेऽपि तत्किमित्यजानन्तः तूष्णीमासन्। द्वित्राः परमयं जन्तुः अस्मदीयभाषां श्रुत्वा परिहसति इति मनस्सु अचिन्तयन्। कतिपयक्षणानन्तरं "किं मए सुदं, किं एदं" (किं मया श्रुतं, किमिदम्) इति वचनानि यदा दूरस्थैः श्रूयेरन् तथा स जिहेष। अथाद्य स जन्तुः भाषते इति सर्वेऽप्यजानन्। स्वीयभाषाः तेन मृगेण न परिज्ञायन्ते। तत्किं कर्तव्यमिति ते नाध्यगच्छन्। किन्तु तस्मिन् मृगे कश्चन विशेषः दृश्यते। सः न बिभेति। न कम्पते। स्वं परितः स्थितान् जनान् निर्लक्ष्यमीक्षते।

सैनिकाः तं परितः नलिकास्सज्जीकृत्य उपविष्टास्सन्ति। तस्य जन्तोः दृष्टिः आयसशलाकाः समालम्ब्य तिष्ठतः कस्यचन सैनिकस्य हस्ते स्थितायाः नलिकायाः उपरि पपात। अनुपदं स सैनिकः त्रिचतुराणि पदानि पश्चात् गतः नलिकाम् उद्धार। स जन्तुः तस्य सैनिकस्य भयं ज्ञात्वा तत्करस्थं किमपि मारणायुधमिति बबुधे। सविमर्शं तां नलिकां परिशील्य स्वहस्ते तत्प्रदानाय अपृच्छत्। सैनिकः नाऽदात्। सर्वेऽप्याश्चर्येण पश्यन्ति स्म। अथ सूर्यः अस्तं जगाम। जनाः स्वस्वमार्गेण निरगच्छन्। कस्यचन रक्षकभटनिरीक्षकस्य कुमारः अष्टवर्षप्रायः विनोदाय स्वहस्तगतेन वीटा (bat) दण्डेन तं मृगं पश्चात्तः तुतोद। मृगः परिवृत्य अपश्यत्। सः बालः दूरमधावत्। तं ग्रहीतुं मृगः स्वहस्तमायसशलकाभ्यन्तरात् बहिः प्रासारयत्। स बालः नागृह्यत। किन्तु कश्चन सैनिकः गृहीतः आसीत्। नरतुरगः तस्य हस्तात् नलिकामाकृष्य कूटयन्त्राभ्यन्तरं निनाय। अनुपदं जनाः इतस्ततः पलायन्त। सैनिकाः रक्षकभटा अपि भीत्या ततो निर्गन्तुमैच्छन्। परन्तु नगराध्यक्षस्याज्ञया ते न चलितुं शेकुः। स मृगः नलिकां गृहीत्वा परिशीलयितुमारेभे।

3

मृगहस्तं गतायाः तस्याः नलिकायाः पुनर्ग्रहणं कथमिति ते अधिकारिणः विचारयन्ति स्म। तेषु तथा विचारयत्सु स जन्तुः तां

In Public domain. Digitization Muthulakshmi Research Academy

नलिकामितस्ततः परिवर्त्य परिशीलयितुमारेभे। तस्मिन् समये तस्य मृगस्य हस्तः यदा कदापि तन्नलिकायाः प्रधानकीले (ट्रिग्गर्) निपतेदिति तेन सा प्रस्फुटेदिति यः कोऽपि निहतो भवेदिति च सर्वे बिभ्यति स्म। यदि नगराध्यक्षः नाज्ञापयिष्यत्, तर्हि ततः पूर्वमेव सामान्यसैनिकास्सर्वेऽपि पलायिष्यन्त। तेषु वृद्धः कश्चन सैनिकनिरीक्षकः उपायमेकमालोचयामास। सः कञ्चन ग्रामशुनकमानाय्य तस्मिन् जन्तौ पश्यति, तं नलिकया मारयामास। स शुनकः अनुपदं ममार। तदनु सर्वाः अपि नलिकाः मृगाभिमुखं कृत्वा "तां नलिकां बहिर्निक्षिप। नो चेत् अभिघातयिष्यामः" इति समज्ञापयन्। कूटयन्त्रान्तस्स्थितः मृगः साभिप्रायं नलिकामपश्यत्। शुनकघाती निरीक्षकः स्वनलिकाम् अग्निगुलिकाभिः (bullets) पूरयामास। मृगः तद्विलोक्य किमालोचयदिति न जानीमः। किन्तु अनुपदं तां नलिकां बहिरदात्। स्वहस्तात् नलिकां गृह्णन्तं नलिकामूलेन मृगः तुतोदेव। स सैनिकः उत्तानः पपात। मृगः रात्रिषु नेत्रे निमील्य आप्रभातं ध्यायति स्म। रात्रिषु तस्याच्छादनाय द्वे कम्बलवस्त्रे कूटयन्त्राभ्यन्तरे निचिक्षिपुः। चिरं ते तथैवास्ताम्। परन्तु अद्यत्वे स मृगः ते गृहीत्वा समाच्छादयति स्म।

एवं स्थिते जन्तुप्रदर्शनशालाधिकारी मृगमेनं स्वशालां नेतुं नगराध्यक्षाय प्रार्थनापत्रं प्रेषयामास। अधिकारिभ्यः सर्वेभ्योऽपि न्यवेदयत्। किन्तु नगराध्यक्षः तं मृगं परित्यक्तुं नैच्छत्। अनेन हेतुना तयोः वैमनस्यमजायत। मृगशालाधिकारी तावत् एवमालोचयत् – सर्वेषु निद्रितेषु मृगं लारीशकटमारोप्य मृगशालां नेष्यामि इति। तस्यामेव रात्रौ सः आवश्यकान् प्रयत्नान् सर्वानपि चकार। तत्र रक्षणपदे नियुक्तान् रक्षकभटान् धनादिभिः प्रलोभ्य मृगापनयनसमये तूष्णीमवस्थानाय अङ्गीकारयाञ्चकार। अथापि सः बिभेत्येव। यतः लण्डन् नगरे तादृशकार्यनिर्वहणम् असम्भवमेव। तत्र नगराध्यक्षस्सर्वाधिकारी। कदाचिदस्य मृगशालाधिकारोऽप्यपेयात्। अथापि

In Public domain. Digitization Muthulakshmi Research Academy

तद्देशीयानां विचित्रमृगविषये विद्यमानेन कौतुकातिशयमहिम्ना स एवं कर्तुं व्यवास्यत्।

तस्यां रात्रौ यामद्वयप्रान्ते विंशतिर्मनुष्याः लारीशकटेन समागत्य कूटयन्त्रं समया तस्थुः। तदा किञ्चिदिव शब्दः बभूव। तस्मिन्नेव समये तावपर्त्यन्तं निद्राणाः सैनिकास्सर्वेऽप्युदतिष्ठन्। सैनिकनिरीक्षका अपि प्राबुध्यन्। अथ मृगशालाधिकारी ततः परं मृगनयनमशक्यमिति निश्चित्य केनापि कार्यान्तरवशेन समागत इवाभिनयन् लारीं निनाय।

परेद्यवि प्रभाते स मृगः स्नातुमैच्छत्। जलनालिकाभिः जलं प्रसारयितुं ते प्रायतन्त। स मृगः हस्तेन "मा नाम तथा" इति न्यषेधीत्। तर्हि कथं सः स्नास्यति। किमपि पृच्छन्निव सः आजुघोष। स घोषः दूरस्थैः एवमश्रूयत – "पुच्छस्सं अत्थिवा एत्थ णदी" (पृच्छामि अस्ति वा अत्र नदी) इति। पदानामेषामर्थः तैः नाबुध्यत। तस्मिन् समये नगराध्यक्षः तावति दूरे आसीत्, यावति स घोषः पदसमुदायत्वेन श्रूयेत। सः सा भाषेति विज्ञाय विसिष्मिये। तत्पूर्वेद्युः अहोरात्रं तस्य मृगस्य समीप एवावस्थानात् तेन सः घोषः घोषवदेव श्रुतः आसीत्। कावेयं भाषा स्यात्। नायं जन्तुः कस्यापि देशस्य सम्बन्धी मानवः स्यात्। भूगोलशास्त्रं, चरित्रशास्त्रञ्च ईदृशमानवानामवस्थानं स्थानञ्च न बोधयतः। नगराध्यक्षः तत्रैव तस्थौ। यदि पुनरपि मृगः भाषिष्यते, तर्हि श्रोष्यामीति। पुनस्स मृगः जुघोष। तस्मिन् "पुच्छस्सं अत्थिवा एत्थ णदी" इतीमान्यक्षराणि नगराध्यक्षेण स्फुटमश्रूयन्त। तदा प्रातः कालः क्रमेणापैति। जनाः मृगं द्रष्टुम् आयान्ति स्म।

तेष्वेकः लण्डन् विश्वविद्यालये संस्कृताध्यापक आसीत्। सोऽप्याङ्ग्लेय एव । ईदृशो मृगः कश्चिदुपलब्ध इति जनाः तस्मै पञ्चदशदिनेभ्यः कथयन्त्येव। परन्तु सः न व्यश्वसत्। ईदृशान् विषयानपामरा इव पण्डिताः निर्विमर्शं न विश्वसन्ति किल। ह्यः स मृगः प्रबुद्ध इति भाषते इति

In Public domain. Digitization Muthulakshmi Research Academy

च अकथयन्। तेषां कथनेन इमां वैचित्रीं द्रष्टुं स पण्डितः इयद्भ्यो दिनेभ्यः पश्चात् तत्राजगाम। आगत्य च नगराध्यक्षस्य समीपे तस्थौ। मृगस्य तानि वचनानि तस्य श्रवणयोरप्यपतन्। तच्छ्रुत्वा सः नगराध्यक्षं बभाषे, नैतत्संस्कृतम्। किन्तु संस्कृतसदृशमास्ते। संस्कृतादुद्भूताः भाषा बहव्यस्सन्ति। ताः प्राकृतपैशाचीत्यादिनामभिः व्यवह्रियन्ते। एषापि तास्स्वन्यतमा भवेत्। मत्सकाशे प्राकृतभाषा निघण्टुरस्ति। तमानेष्यामि। अथ च यद्ययं प्राकृतं जानाति तर्हि संस्कृतमपि किञ्चित् जानीयादेव इत्युक्त्वा स्वयं कूटयन्त्रसमीपं जगाम। गत्वा तं मृगं विलोक्य हस्तेन संज्ञापयन् "किमात्थ" इत्यपृच्छत्। तच्छ्रुत्वा स जन्तुः अनुपदमेव कर्णौ उन्नमय्य, नेत्रे विस्फार्य, हस्तौ प्रसार्य उच्चैः अहेषत। पृष्टः मृगः किमपि किमपि कथयति। परन्तु सः न जानाति। किञ्चित् कालानन्तरं समीपे अवस्थाने स्फुटं न श्रूयत इति, दूरे अवस्थाने स्फुटं श्रूयत इति च ते सर्वेऽप्यजानन्। तस्य जन्तोः कण्ठः पृथुलः तस्मान्निर्गच्छन् ध्वनिः समीपस्थैः केवलं घोष इव श्रूयते। दूरगमने तु स ध्वनिः विरलीभवति। तदा तत्रत्याः वर्णाः स्फुटं श्रूयन्ते। स पण्डितः दूरं गत्वा पुनश्शुश्राव। अक्षराणि स्फुटं श्रुतानि। "अत्र समीपे अस्ति वा काचिन्नदी। स्नातुमिच्छामि" इति पदानि स्फुटमश्रूयन्त।

परन्तु काचिद्बाधा तत्र सञ्जाता। तस्य मृगस्य भाषणं श्रोतव्यमित्युक्तौ शतबाहुप्रमाणदूरं गन्तव्यम्। तेन सह सम्भाषणीयमित्युक्तौ तत्समीपमागन्तव्यम्। एवं सुदूरगमनं समीपागमनम् अशक्यं व्यभाव्यत। पण्डितः नगराध्यक्षायाकथयत् स मृगः स्नातुमिच्छति काप्यस्ति वा नदीति पृच्छति इति। नगराध्यक्षस्य हृदये भीतिरजायत। एतस्य मृगस्य नदीं प्रति नयनं कथम्। स्नापनञ्च कथम्। स्नापितोऽयं कदाचित् नद्याः न समागच्छेदपि इत्येवमालोचयितुमारेभे। सर्वेऽप्यधिकारिणः मिलित्वा समालोचयन्। तस्य जन्तोः नदीं प्रति नयनं तत्र स्नापनञ्च युंक्त न वा इति। अस्य वस्तुतः स्नापनं

In Public domain. Digitization Muthulakshmi Research Academy

कथमिति प्रश्नः उदियाय। भवतु, तत्पश्चात् द्रक्ष्यामः। प्रथममस्य नदीं प्रति नयनं युक्तं नवेत्यपृच्छन् केचित्। अयं मृगः उष्णदेशस्थ इव प्रतिभातीति कश्चित् प्राह। मृग इति किमेतत्। स संस्कृतं भाषते किल। सा भाषा अत्युत्तमेति, तस्यां उत्तमोत्तमाः ग्रन्थास्सन्तीति च कथयन्ति। तादृशीं भाषां भाषमाणोऽयं कथं मृगो भवेत् इत्यन्वयुङ्क्तान्यः। अपरः प्राह – सः मृग मनुष्यो वेति ज्ञातुं न शक्यते। शिरः अश्वस्येवास्ति। भाषणानि तु मनुष्यस्येव दृश्यन्ते। तत्रापि संस्कृतं भाषते इत्युक्तौ सुमहत्याः नागरकजातेः सम्बन्धीति मन्तव्यम्। वस्तुतः तच्छरीरे विद्यमानानां वस्त्राणामाभरणानाञ्च दर्शने नागरक इत्येव प्रतिभाति। अतः अस्य नदीस्नानाय अवकाशः दातुं शक्यते इति। कश्चन सैनिकनिरीक्षकः प्राह – मृगस्य भाषा संस्कृतं स्यात् न वा स्यात् पण्डितेन तथा विभावितमपि भवेत्। अपि च भाष्यमाणभाषामनुसृत्य भाषकस्य नागरकता कथमुन्नेतुं शक्यते। केचन मनुष्याः नागरकभाषां भाषमाणाः हृदयेन राक्षसाः भवन्ति। अतः अस्य मृगस्य नदीं प्रति नयने कदाचिदयं मार्गमध्ये मनुष्यान् मारयेदपि। अत्र अन्यापि बाधा अस्ति। "हिपोपोटमस्" नामिका काचन जलाश्वजातिः विद्यते। अयं तज्जातीयश्चेत् यदा वयमेनं जले अवतारयिष्यामः तदासौ जले निमज्ज्य पुनरस्माकमवशो भवेत्। तथा अदृश्यो भूत्वा कारागारे वयमबध्नीमेति कृत्वा कदाचिदपकुर्यादपि। अतः नदीं प्रति अस्य अनयनमेव समीचीनमिति।

तस्य वादः सर्वेषामप्यभिमत आसीत्। सत्यं, सत्यमित्यूचुः। यद्ययमपसृत्य हिपोपोटोमस् जात्या समामिलेत् तदा अस्मदीयपरिशोधनस्य महान् विघ्नो भविष्यति। वयं सर्वेऽपि आफ्रिका, आस्ट्रेलिया, दक्षिणामेरिकादिदेशेषु विद्यमानान् परमरहस्यविषयान् ज्ञात्वा बहून् ग्रन्थान् प्रकाशयामः। मृगस्यास्य परिशोधनात् पूर्वमेव हस्तादपयापनं न युक्तम् इति ते निरचिन्वन्। निर्णयोऽयं तस्मै मृगाय यदि कथ्यते कदाचित् सः कुप्येदपि इति

In Public domain. Digitization Muthulakshmi Research Academy

विचिन्त्य पुनरप्यन्यामालोचनामकुर्वन्। मृगाय नायं विषयः कथनीयः। नात्र परिसरे कुत्रापि नद्यस्तीति कथयामः इति। पण्डितमुखेन तदेव ते तस्मै समाश्रावयन्। एतद्वाक्यश्रवणानुपदमेव स मृगः मुखेन दुःखमसूचयत्। किमप्यालोचमान इव अदृश्यत। तदा महान् कालो व्यतीतः। अतः जलनालिकाभिरेव तं मृगं समस्नापयन्। स मृगः पुनरपि नेत्रे निमील्य कञ्चित् कालं ददध्यौ। सेवकाः प्रसेवैः फलान्याहरन्। सः तान्यभ्यवाहरत्।

4

स मृगः भाषते इति, सा भाषा संस्कृतमिति, अस्नात्वा स न भुङ्क्ते इति, भोजनात् पूर्वं सः किमपि ध्यायतीति च, इयं वार्ता प्रतिदेशं व्याप्नोत्, तेन यूरपदेशे महान् कोलाहलस्समजनिष्ट। जर्मनीतः प्रस्थाय संस्कृतपण्डिताः बाष्पशकट (Rail) पर्याप्ताः लण्डन् नगरमागच्छन्। तं मृगं विलोकयितुं समागतानां जनानां कृते तत्र अवकाशः पर्याप्तः नासीत्। अतः मृगाय अन्यत् भवनं निरमायि। तस्मिन् भवने वायुसञ्चाराय समीचीनः अवकाशः कल्पितः। तद्भवनमत्यन्तमुन्नते प्रदेशे निर्मितमासीत्। भवनस्य कुड्यानि न सन्ति। परितः द्रढिष्ठाः आयसशलाका निखाताः। भवनं परितः सुविशालः शाद्वलः प्रदेशः परिकल्पित आसीत्। तमावृत्य समुन्नतः प्राकारः बभूव। तं मृगं तस्मात् पञ्जरात् अन्यत् सुमहत् सचक्रमायसपञ्जरं प्रवेश्य ततः तन्नूतनभवनं प्रावेशयन्। तस्मिन् भवने तस्य मृगस्य सर्वाणि सौकर्याणि पर्यकल्प्यन्त। एकस्मिन् सुमहति प्रकोष्ठे सुविशाला खट्वा विन्यस्ता। तदुपरि द्वित्राणि तूलिकातल्पानि पर्यास्तृतानि। उपधानानि च तत्तत्स्थानेषु निक्षिप्तान्यभवन्। तस्य प्रकोष्ठस्य पार्श्व एव स्नानशाला निरमायि। बंहीयस्या धारया परिशोभिताः यान्त्रिकजलनालिकाः तत्रासन्। तत्रैव अङ्गवस्त्राणि फेनपिण्डानि च (Soap) विन्यास्यन्। बहिः प्रकोष्ठके पञ्चषाणि वेत्रासनानि शयनासनानि च (Easy Chair) निक्षिप्तान्यभवन्। सर्वाण्यपि

In Public domain. Digitization Muthulakshmi Research Academy

तच्छरीरप्रमाणानुरोधेन निर्मितान्येव। सर्वस्याप्यस्य कार्यस्य निर्वहणे मासद्वयं व्यतीतम्। अन्यस्मिन् सम्भारप्रकोष्ठके मृगाय आहारपदार्थाः न्यक्षिप्यन्त। तत्र प्रसेवेषु विविधानि फलानि सुसज्जितानि सन्ति। यदा मृगः क्षुधितो भवति तदा तत्र प्रविश्य फलानि भक्षयति। मासद्वयानन्तरं तस्य मृगस्य पानीयपात्रमेकमावश्यकमिति ते व्यजानन्। अतः द्वित्राः कलशाः अपि तत्र विन्यस्ताः। तस्य परिधानाय तत्प्रमाणानुरोधेन द्वौ यामावपि (Pant) सीवितौ।

अथ मासद्वयात्परं जनाः तदीयपञ्जराभ्यन्तरे पुनः गमनागमनादिकं कर्तुमारभन्त। अद्य परिनिष्ठिताः शतं संस्कृतपण्डिताः जर्मन्–फान्स्–आङ्ग्लदेशीयाः तं मृगं परित्यज्य न गच्छन्ति स्म। सर्वदा तं परित एव वर्तन्ते। तेन सह सम्भाषन्ते। तदीयभाषणानि स्वीयभाषासु परिवर्त्य स्वीयपत्रिकाभ्यः प्रेषयन्ति। तेन मृगेण सह सम्भाषणं कष्टसाध्यमिति कृत्वा तन्मुखस्य पुरतः यन्त्रमेकं समस्थापयन्। सम्भाषणसमये स मृगः तं यन्त्रं स्वमुखप्रान्ते निदधाति। तेन तन्मुखात् विनिस्सरन् ध्वनिस्सर्वोऽपि सूक्ष्मीकृतस्सन् सहजभाषेव श्रोतृभिः श्रूयते स्म। तस्य यन्त्रस्य प्रयोजनं पण्डिताः तस्मै न्यवेदयन्। सोऽपि जन्तुः तथा कर्तुमङ्गीचकार। एवं कतिपयदिनेषु गतेषु तेषां भाषणं तेन जन्तुना स्फुटं न श्रूयते इत्यवागच्छन्। अतः ध्वनिविस्तारकयन्त्राणां समीपे ते पण्डिताः भाषितुमारभन्त। प्रथमं स जन्तुः यूरप्देशीयैः भाष्यमाणं संस्कृतं सम्यक् न बुध्यति स्म। अथापि कालक्रमेण परिचयवशात् तेषां भाषणानि अवगन्तुं प्राभवत्। ते हि अस्ति किल इति वक्तव्ये अकारं एकारत्वेन सकारं पकारत्वेन लकारं ळकारत्वेन चोच्चारयन्ति। नारायणः इति पदं नरयणाः इति पठन्ति। प्रथमदशायामीदृशमुच्चारणमवगन्तुं स जन्तुः न प्राभवत्। परन्तु कालक्रमेण इयमपि प्राकृतभाषास्वन्यतमेति विभाव्य जानाति स्म। अधुना तं जन्तुं द्रष्टुं पूर्वमिव सर्वेषां नास्त्यवकाशः। प्रवेशचीटिकाः (Ticket)) परिकल्पिताः। वेला च निर्णीता। आवरणात् एकवारदर्शने एकविधम्, आयसशलाकापर्यन्तं

In Public domain. Digitization Muthulakshmi Research Academy

गत्वा दर्शने अन्यविधश्च शुल्कं निर्णीतम्। तत्समीपं गत्वा तेन सह सम्भाषणे दशपौण्ड् (Found) मितं द्रव्यं देयमासीत्। एवं प्रतिदिनमुपशतं पौण्ड् परिमितः आदायः तैः लभ्यते स्म।

केचित् विषयमेकं समजानन्। स जन्तुः नैव निद्रातीति। प्रतिदिनं प्रातरेव स्नाति। आहारमेकवारमेव स्वीकरोतीति च। निद्राण इव सः खड्गामधिशेते। तेन क्रियमाणाः चेष्टाः अतीव विचित्राः दृश्यन्ते। स शिरः भूमौ निधाय पादावूर्ध्वमुत्क्षिप्य कतिपयघण्टापर्यन्तं तिष्ठति। कदाचित् पादयोः पार्ष्णिभागौ स्वासनाधो निक्षिप्य श्वासं निरुध्य निश्चलं तिष्ठति। एवं द्वित्रघण्टापर्यन्तं तिष्ठति। तादृशसमये तेन सह सम्भाषणाय प्रयत्ने कृतेऽपि प्रयोजनं न भवति।

अथ तेन सह पण्डितैः कृतानि भाषणानि पत्रिकासु प्राकट्यन्त। तानि कानिचित् अत्रालिख्यन्ते। नैकापि पत्रिका तदीयप्रसङ्गप्रकटनं विना तदा प्रचलति स्म। यूरप् देशेषु सर्वेष्वपि स नरतुरग इति, तदीय चित्रचित्रणं (Photo) तमधिकृत्य विचित्रविधया वर्णनं, तेन सह पण्डितैः कृतानां सम्भाषणानां सम्यक्प्रकाशनश्च प्रतिपत्रिकं दृश्यते। जनाः सकुतूहलं ताः पठन्ति। दिने दिने पण्डितः "आर्य, भवतां देशः कः"।

हाहा – नाहं जाने।

पण्डितः – को भवान् ?

हाहा – नाहं जनामि।

पण्डितः – कथमत्रोपयातोऽसि।

हाहा – न मे ते विषयाः प्रतिभान्ति। किमपि बुध्यामीव। परन्तु सर्वं विस्मृतम्।

पण्डितः – भवन्नामधेयं किम्?

In Public domain. Digitization Muthulakshmi Research Academy

हाहा – आम्, आम्, बुध्यामि, हाहा। सम्यक् न स्मरामि।

पण्डितः – भवतः संस्कृतभाषा कथं परिचिता?

हाहा – कथं परिचितेति कोऽयं प्रश्नः स्वयमेव सा परिचिता।

पण्डितः – अपि नाम भवद्देशे सर्वोऽपि संस्कृतमेव भाषते?

हाहा – आम्, सर्वे भाषन्ते इत्येव स्मरामि। परन्तु मम देशः क इति तु न स्मरामि।

पण्डितः – भवदीया जातिः (Nation) का?

नरतुरगः आलोच्य प्रश्नस्यास्य समाधानं नादात्। अन्यस्मिन् दिने पण्डितास्तमेवमपृच्छन्। अपि नाम श्रुतं भवद्भिः भवद्देशे लण्डन् इति नाम। मध्ये कश्चन जर्मन्पण्डितः "अपि श्रुतं बेर्लिन् इति नाम भवद्भिः" इति अपृच्छत्। कश्चन फ्रेञ्च् पण्डितः "किं प्यारीसिति नाम श्रुतम्" इति पप्रच्छ। स नरतुरगः तान्विलोक्य आश्चर्यविद्धः आसीत्। अत्रान्तरे पण्डितः कश्चित् भवन्नामधेयं "हाहाहूहू" इति वा इत्यपृच्छत्। अनुपदं नरतुरगः आश्चर्यचकित इव जृम्भमाणः नेत्रे विस्फार्य समुदतिष्ठत्। अङ्गभङ्गं सूचयन् अन्तरेव दुःखित इवादृश्यत। तन्मुखात् अथ किम् इति वचनं शब्दविस्तारकयन्त्रं विना समुदितं बंहिष्ठगर्जितमिवाश्रूयत।

तदा प्रभृति पण्डिताः तं हाहाहूहूः इति कथयितुमारभन्त। तस्य नाम सुदीर्घमिति मत्वा हाहूः इति सञ्चिक्षिपुः। भवन्नामधेयं "हाहाहूहूः" किल इति प्रथमं पृष्टवन्तं पण्डितं विलोक्य सर्वेऽपि कथमयमजानात् इति आश्चर्यं प्रापुः। सः पण्डितः भारतदेशे संस्कृतलिप्यां मुद्रितां शब्दमञ्जरीं दृष्ट्वा तत्पदं ज्ञातवान्। तस्य पदस्य कश्चन गन्धर्वः इत्यर्थोऽपि तत्रैव प्रदर्शितः आसीत्। गन्धर्वो नाम मनुष्यजातिष्वन्यतमजातेस्सम्बन्धीति सः अमन्यत। न ततोऽधिकं सः पर्यालोचयत्। विषयमिमं स अन्येभ्यः परिशीलकेभ्यः न्यवेदयत्। तेऽपि

In Public domain. Digitization Muthulakshmi Research Academy

किञ्चित्कालमालोच्य गन्धर्वो नाम देवयोनिः। देवयोनिर्नाम देवेभ्यः किञ्चिदूनः इति च विज्ञाय वस्तुतः देवा एव न सन्तीति प्रबलविश्वासशालिनस्ते सिद्धान्तमिमं निराचक्रुः। परन्तु तस्य नरतुरगस्य आकारभाषणादीनां परिशीलने, ग्रन्थेषु गन्धर्वानधिकृत्य विलिखितं सर्वं समन्वेति।

तदनु पण्डितास्सर्वेऽपि रहसि काश्चित् सभामकुर्वन्। तत्र चर्चनीयो विषयः न प्रकाशितः। महापण्डिताः केचिदेव तत्र सममिलन्। अयं नरतुरगः भारतीयविश्वासपात्रदेवतासु अन्यतमः इति प्रकाशनं युज्यते वा न वा इतीमं विषयमधिकृत्य ते व्यचारयन्। विषयस्यास्य प्रकाशने बहवो दोषाः सन्तीति निरचिन्वन्। अत्रान्तरे एवायं विषयः प्रभुत्वाधिकारिभिः ज्ञातः आसीत्। पण्डितास्सर्वेऽपि मिलित्वा रहस्यमिदं नाविष्करिष्यामः इति प्रभुत्वाधिकारिभ्यः प्रत्यजानन्त। काण्टरबरी आर्चिबिषप् महाशयः अस्याः रहस्यसभायाः आध्यक्ष्यमुदवहत्। सम्यक्परिशील्य यदि विषयोऽयं यथार्थ एव भवेत् तदा लोके प्रकाशयिष्यते इति तेषामाशयः आसीत्। यदि कदाचिदयं गन्धर्व एव न भवेत्। तदा वृथैव गन्धर्वोऽयमिति प्रचारणेन मूढविश्वासप्रोद्बलकाः भविष्यामः इति मत्वा ते सर्वेऽपि तूष्णीमभवन्। विषयोऽयमितोऽधिकं परिशील्यतामिति प्रभुत्वाधिकारिणः पण्डितानादिशन्। तेऽपि ओमित्यङ्गीचक्रुः। नायं गन्धर्वः इत्यत्र प्रबन्धहेतुरेको वर्तते। गन्धर्वाणां पक्षौ भवतः। ताभ्यां ते गगने डयन्ते। ते अत्यन्तं सुन्दराश्च भवन्ति। तानि लक्षणानि नास्मिन् दृश्यन्ते।

अतः नाऽयं गन्धर्वः इत्येव ते निरचिन्वन्। अपि च पक्षाभ्यां कश्चन नरतुरगः गमने डयिष्यत इति सङ्गच्छते च।

5

जर्मन्देशभाषाशास्त्रवेत्तृषु कश्चन प्रसिद्धः पण्डितः विद्यते। अश्वः भाषत इति श्रवणादारभ्य सः अतीव सन्देग्धि। फ्रान्स्देशे कश्चन पशुशास्त्रवेत्ता वर्तते। सोऽपि अश्वः भाषत इति श्रुत्वा संशेते। तयोः द्वयोरप्यस्मिन् विषये नैव

In Public domain. Digitization Muthulakshmi Research Academy

विश्वासः सञ्जातः। कथं जायते। तौ किल द्वावपि स्वस्वशास्त्रेषु अतीव निष्णातौ। तयोः प्रथमः "मानवैः उच्चार्यमाणानां वर्णानां वैविध्यस्य स्फुटतायाश्च कारणं तदीयमुखावयवनिर्माणविशेष एव। दन्त्यतालव्याद्युच्चारणानुकूलतया ते निर्मिताः। तादृशनिर्माणाभावे ते ते वर्णाः तथा नोच्चारयितुं शक्यन्ते" इति दृढं विश्वसिति। सः अन्यं भाषाशास्त्रतत्वज्ञं प्राह – "पश्यतु भवान्। ताल्वधरजिह्वाग्रेषु कस्यचन यदि स्थौल्यं भवति तदा तदुच्चारणं न स्फुटं भवति। यदि तु सर्वधैव स्थौल्यं तत्र भवेत् तदा तालव्यादिध्वनयः नैवोत्पद्यन्ते। अत एव किल पशवः मानवा इव उच्चरितुं न प्रभवन्ति। अन्यच्च मानवकण्ठध्वनौ किमपि मार्दवं व्यक्तं भवति। जन्तूनां कण्ठबिलानि कठिनध्वनिमेव जनयन्ति। वर्णरूपध्वनिप्रकाशने तु तानि नोपयुज्यन्ते" इति। पुनरपि स एवं प्राह – "तस्य अश्वस्य ध्वनिः दूरस्थैः वाक्यवत् श्रूयते। समीपस्थैस्तु घोषवत् श्रूयते इति पत्रिकासु पठितं किल। वस्तुतः समीपस्थैः घोषवच्छ्रूयते इत्येव सत्यं स्यात्, अन्यत् अस्मदीयैः कल्पितं भवेत्" इति। अथ द्वितीयः प्राह – "पत्रिकासु तदीयसम्भाषणादिकं मुद्ग्रते किल इति तत्सर्वं कल्पितमित्येव मन्तव्यं भवति" इति प्रथमः समादधौ।

पशुशास्त्रज्ञोऽपि एवन्नविश्वसिति। स किल पशूनां बहूनि मस्तिष्काणि पर्यशीलयत्। तेषु मनुष्यविज्ञानसम्बन्धिन अणवः नैवादृश्यन्त। मानवमस्तिष्कं तदन्यमस्तिष्केभ्यः अत्यन्तं विलक्षणम्। तत्र न सम्बन्धलेशोऽप्यस्ति। पशूनां शिरःकपालकुहरे मानवीयमस्तिष्कं न भवितुमर्हति। अतः स एवमचिन्तयत् – "अहं बहूनां वानराणां मस्तिष्काणि पर्यशीलयम्। तेषां मस्तिष्काणि मानवमस्तिष्कैः किञ्चिदिव सादृश्यं वहन्ति। मार्दवं तेषां मस्तिष्केष्वपि दृश्यते। अश्वशिरसि तादृशं ज्ञानप्रकाशकमस्तिष्कस्यावस्थानं शङ्कितुमपि न शक्यते। अश्वशिरसि विद्यमानस्य मस्तिष्कनिलयस्य मानवशिरसि विद्यमानस्य मस्तिष्कनिलयस्य च नास्ति सम्बन्धः। पश्यत मनुष्यशिरः

In Public domain. Digitization Muthulakshmi Research Academy

विस्तृतकपालघटितम्। अश्वशिरस्तु न तथा। मनुष्यशिरसः तदितरजन्तुशिरसाञ्च अत्यन्तं भेदो विद्यते। मानवशिरसि केशाः प्ररोहन्ति प्रवर्धन्ते च। केशोत्पादिका शक्तिः मानवशिरसि विद्यते। तादृशशक्तिः मानवमस्तिष्कस्वभावमनुसृत्यापि भवति। पशूनां शिरस्सु केशाः न रोहन्ति। अश्वानां सिंहानां च शिरस्सु यद्यपि ते दृश्यन्ते तथापि ते न केशाः किन्तु सटाः। ताः अपि ग्रीवोपरिभाग एव भवन्ति न शिरसि। बहुधा पर्यालोचनेऽपि अयं विषयः असम्भवन्निव दृश्यते"। अयं पशुशास्त्रनिष्णातस्य वादः।

एतौ द्वावपि लण्डन् नगरं प्रति प्रस्थितौ। भाषाशास्त्रज्ञः प्रथमं तन्नगरं प्राप। तत्रत्यपण्डितैस्समगच्छत। तेषु पण्डितेषु भाषाशास्त्रज्ञा अपि बहवः आसन्। ते एतदीयानि वचनानि अङ्गीचक्रुः। बाह्याभ्यान्तरप्रयत्नयोः सतोरेव शब्दोच्चारणं भवति, नान्यथा। तत्रापि स्पृष्टेषत्स्पृष्टादयो भेदाः भवन्ति। सर्वोऽप्ययं व्यवहारः मनुष्यज्ञानसम्बन्धी। हाहाहूहूस्तु अश्वस्य शिरो वहति। अतोऽयं विषयः चर्चनीय एव इति ते प्राहुः।

भाषाशास्त्रज्ञः – भवन्तस्सर्वे बहुभ्यः दिनेभ्यः तेन मृगेण...

पण्डितः – मृगेणेति न वक्तव्यम्। तेन पुरुषेण इत्युच्यताम्।

भाषाशास्त्रज्ञः – तेन सह भाषन्ते किल। भवन्तः किं दूरे स्थिताः भाषन्ते आहोस्वित् समीपे स्थित्वा। भाषणसमये तस्य मृगस्य...न न, तस्य जिह्वादन्तादिकं किं पर्यशील्यत? तत्कथं वा विद्यते।

पण्डितः – न वयमवालोकयाम। तदीयमुखात् निर्गच्छन् ध्वनिः महाघोषवत् श्रूयते। तस्मिन् ध्वनौ वर्णाः स्फुटं न श्रूयन्ते। अतः अस्माभिः तन्मुखप्रान्ते ध्वनिसङ्कोचकयन्त्रः स्थापितः। सोऽपि तन्मुखेन

In Public domain. Digitization Muthulakshmi Research Academy

भाषते। अनेन कारणेन तदीयजिह्वादिपरिशीलनावकाशः नास्माकं सञ्जातः।

भाषाशास्त्रज्ञः – तर्हि तस्य जृम्भणसमयेऽपि वा किं ते नावलोकिताः?

पण्डितः – नावलोकिताः। सः द्वित्रवारम् अजृम्भत। तच्च तस्य उत्थानसमये एव। स तावत् अष्टपदोन्नतः। अस्मच्छिरसाम् उन्नमनेऽपि तदीयमुखकुहरं नावलोक्यते।

भाषाशास्त्रज्ञः – मदभिप्रायेण एतत्सर्वमपि यत्किमपि छलमिव दृश्यते। यत्र कुत्रापि देशे अष्टपदोन्नतस्य मानवस्य अवस्थितिः भवति चेत् भवतु नाम। तादृशवैचित्र्याः इदानीं कति कति न सम्भवन्ति इदमपि तथैव स्यात् वा। नो चेत् सः यन्त्रनिर्मितं किमपि तुरगशीर्षं धृत्वा समागतो भवेद्वा? भवद्भिस्समीपङ्गतैः यदा कदापि किमेतत् परिशीलितम्।

पण्डितः – न परिशीलितम्। तत्समीपगमने यः कोऽपि प्रमादः सम्भवेदिति सर्वे बिभ्यति। परन्तु नास्माकं तादृशं भयं विद्यते।

भाषाशास्त्रज्ञः – तस्य अत्र आगमनात्परं तस्मात् यस्य कस्यापि यः कोऽप्यपकारः किं समभवत्?

पण्डितः – न समभवत्।

भाषाशास्त्रज्ञः – भवन्तः अयश्शलाकाशालाभ्यन्तरं प्रविश्य कदापि तत्समीपे किं समुपाविशन्?

In Public domain. Digitization Muthulakshmi Research Academy

पण्डितः – समुपाविशाम। तदापि सः नास्माकं कमप्यपकारमकरोत्।

भाषाशास्त्रज्ञः – तर्हि सः साधुरित्येव मन्तव्यः। तस्मात् कमप्यपकारं शङ्कितुमपि नास्त्यवकाशः। अतः तत्समीपं वयं सर्वेऽपि गच्छामः। गत्वा मुखं व्यादेहीति प्रक्ष्यामः। तदा परीक्षिष्यामहे।

पण्डितः – तथा कथनं न गौरवार्हम्।

भाषाशास्त्रज्ञः – भवतां वचनानि मम विचित्रतया प्रतिभान्ति। कमप्युत्तमं पुरुषमधिकृत्येव भाषन्ते। विचित्रमिदम्। अन्यच्च शास्त्रीयोऽयं विषयः। भवन्तः तमङ्गीकारयत। शास्त्रीय विषययाथार्थ्यपरिज्ञानाय सर्वैरपि विज्ञानिभिः प्रयतितव्यं किल। यदाऽयम् अश्व इव ताल्वादिकं वहन् मानव इव भाषितुं प्रभवति, तदा लोके विद्यमानैः सर्वैरपि जन्तुभिः मनुष्यैः व्यवह्रियमाणाः भाषाः भाषितुं शक्यन्ते किल।

पण्डितः – सत्यमेव। वयं तावत् शास्त्रीयोऽयं विषय इति, यथार्थ्यज्ञानायेदं परिशोधनमिति च भावयामः। परन्तु तेनापि तथैव विभावनीयं ननु। तदीयमुखं परिशोधनीयमित्युक्तौ मुखव्यादानाय सः प्रार्थनीयः। तथा करणं सः अगौरवावहमिति कदाचित् भावयेत्। परह्यः विषयमेकमवालोकयम्। तदीयहस्तात् किमपि वस्तु मया गृहीतमासीत्। अनापृच्छ्य गृहीतमिति

In Public domain. Digitization Muthulakshmi Research Academy

तन्न गौरवार्हमिति च कृत्वा सः तदा मां कोपेनापश्यत्। तादृशः सः एवं कर्तुं नाङ्गीकरिष्यति।

भाषाशास्त्रज्ञः – तर्हि क्लोरोफारं प्रभृतीनि स्मृत्यपोहकान्यौषधानि दत्वा तं निद्रापयिष्यामः। अन्यथा नास्ति परिशोधनस्यावकाशः।

पण्डितः – अस्मदीयान्यौषधानि तच्छरीरे कियत् पर्यन्तं प्रसरन्तीत्ययं विषयोऽपि सन्देहग्रस्त एव। कुत इति चेत्, तदीय बाह्वोः पश्चाद्भागे द्वे सुदीर्घे क्षते स्तः। ते रोपयितुं आदिमेषु पञ्चदशसु दिवसेषु अस्मदीयान्यौषधानि उपायुज्यन्त। तथापि ते न शेमतुः। तस्य प्रबोधानन्तरमौषधं नोपयुक्तम्। तौ व्रणौ तथैव स्तः। सः फलानि भक्षयति। किमर्थं भक्षयतीति न जानीमः। तदीयं शरीरं कदापि मलं न विसृजति। पूर्वं यदा अयं वीथ्यां पतितः आसीत्, तदा वैद्याः एतदीयां नाडीं हृदयञ्च पर्यैक्षन्त। तयोः मनुष्यनाडीहृदययोरिव स्पन्दनं कुत्रापि नोपलब्धम्। एवं स्थिते क्लोरोफारं प्रवेशनस्य कुत्रास्त्यवकाशः। तेन क्लोरोफारं नालिका नासाग्रे निक्षेप्या किल। तथा कर्तुं अस्माभिः पृष्टः सः अङ्गीकरिष्यतीति न प्रतिभाति। अथापि प्रच्छ्यते द्रक्ष्यामः।

भाषाशास्त्रज्ञः – यदि भवदुच्यमानविधया सः तादृशः ज्ञानवान् गौरवाभिज्ञश्च तदा सः अवश्यमेवाङ्गीकरिष्यति। परन्तु तदीया भाषा न मे परिचिता। अतः भवन्तः

In Public domain. Digitization Muthulakshmi Research Academy

मदीयानि वचनानि तदीयभाषायां परिवर्त्य कथयन्तु सः अङ्गीकरिष्यतीति प्रतिभाति। अन्यच्च इदं तत्त्वान्वेषणम्।

इत्येवं ते सर्वे विचार्य निश्चित्य हाहू समीपम् अगच्छन्। तस्मिन् समये हाहूः प्राणानायम्य तिष्ठतिस्म। तदा स पण्डितः "तदासनं पद्मासनमिति तथा वायुनिरोधः प्राणायाम इति च अयं मह्यमवदत्। मासात्पूर्वं एवं त्रिचतुरघण्टापर्यन्तमेव प्राणायामादिकं कुर्वन्नासीत्। अद्यत्वे पुनः प्रतिदिनं सप्ताष्टघण्टापर्यन्तं निर्वर्तयति" इति प्राह।

6

परेद्यवि प्रातः फ्रेञ्च् देशीयः पशुशास्त्रज्ञोऽपि आगच्छत्। सः भाषाशास्त्रज्ञेन सङ्गतोऽभूत्। तयोः अन्योऽन्यं परिचयश्च सञ्जातः।

पशुशास्त्रज्ञः – भवतः यस्सन्देहः, स एव ममापि सञ्जातः। पशूनां शिरसि विद्यमानं मस्तिष्कं मनुष्यमस्तिष्कमिव विज्ञानायतनं न भवितुमर्हति।

भाषाशास्त्रज्ञः – आं सत्यमेव। शब्दोच्चारणसमये अस्माभिः प्रयत्नः क्रियते। स च प्रयत्नः अस्माभिः अज्ञात एव सम्भवति। तत्तच्छब्दोच्चारणानुकूलो वायुः कियान् नाभेः उत्पाद्यः, कियान् कण्ठे निरोध्यः, मुखं प्रवेश्य दन्ततालुमूर्धादिषु तत्तद्वर्णोत्पत्त्यनुकूलतया कुत्र कथं स्पर्शनीयः इत्येतत्सर्वम् अस्मदीयमस्तिष्के विद्यमानेन ज्ञानेनैव निर्वर्त्यते। परन्तु सः नास्माभिः अभिज्ञायते।

पण्डितः – आं संस्कृतवैयाकरणाः एतमेव आभ्यन्तरप्रयत्नं स्पृष्टेषत्स्पृष्टादिभेदैः विभज्य कथयन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

भाषाशास्त्रज्ञः – तैः यत्किमपि नाम क्रियताम्। किं तेन? शब्दोच्चारणसमये निर्वर्त्यमानः प्रयत्नस्तु सः।

पशुशास्त्रज्ञः – एतेषां प्रयत्नानां संस्कृते नामान्यपि सन्ति वा। तर्हि ते भाषाशास्त्रं सम्यक् जानन्तीति विभावनीयम्।

पण्डितः – तेषां ज्ञानस्य पुरतः अस्मदीयं ज्ञानं कियत्।

भाषाशास्त्रज्ञः – कियदपि वा भवतु। तेनाद्य किम्। किन्तु ते प्रयत्नाः ...

पण्डितः – बाह्याः आभ्यन्तराश्च। ताल्वादिस्थानज एव आभ्यन्तरप्रयत्नः इत्युच्यते।

पशुशास्त्रज्ञः – भवतां पारिभाषिकपदानि तथा तिष्ठन्तु नाम। सः प्रयत्नः ज्ञानाभावे न जायते। तच्च ज्ञानं पशूनां मस्तिष्के न भवति।

भाषाशास्त्रज्ञः – भावत्कमास्माकीनञ्च शास्त्रं द्विधा प्रवर्तमानमपि ताभ्यामभिलक्षितः यथार्थविषयस्तु एक एव।

पशुशास्त्रज्ञः – वस्तुतः पशूनां रक्ते मनुष्यरक्ते इव लाघवं (activity) न वर्तते।

पण्डितः – तस्य विषयस्य नात्र प्रसक्तिः। हाहूदेहः मनुष्यदेहकल्प एव। मनुष्यदेहादपि मृदुः सुकुमारतरश्च। मनुष्यरक्तलाघवापेक्षया तदीयरक्ते द्विगुणं लाघवं भवति। अथ भवद्भ्यां तन्मुखावयवान् मस्तिष्कगुणांश्चाधिकृत्य समालोच्यताम्।

भाषाशास्त्रज्ञः – भवान् निष्कारणमेव कोपमाहारयति। अस्माभिः शास्त्रीयः विषयः चर्च्यते। न पुनः तमश्वमुखं परिभवितुं सम्भाष्यते।

In Public domain. Digitization Muthulakshmi Research Academy

पण्डितः – आर्य, एकस्तावत् प्रधानो विषयः। स किल भाषते। सा च भाषा संस्कृतमिति अहं जाने। तेन भाषमाणा भाषेव हृदयङ्गमा भाषा न कुत्रापि संस्कृतग्रन्थे मया समवलोकिता।

स तथा मनोहरं भाषते। तस्य पाण्डित्यं कियदतिशयितमिति न ज्ञायते। सः तथा भाषते इत्युक्तौ तदीयमुखावयवाः तथा भाषितुमनुगुणाः इत्येव खलु निश्चेतव्यम्। तदीय मस्तिष्कमेतादृशज्ञानप्रकाशनानुकूलपदार्थवदित्येव खलु मन्तव्यम्। विषयोऽयं सामान्यज्ञानेनापि अनुमेयो भवति। अथापि परिशीलनीयमिति कथनं न समीचीनम्।

भाषाशास्त्रज्ञः – नायमस्मदीयः परिशोधनाविषयः। तदीयमुखावयवाः मनुष्यमुखावयवेभ्यः भिन्नास्सन्तः तान् शब्दान् जनयन्ति वा इत्येव।

पशुशास्त्रज्ञः – मयापि तदेव परिशिशीलयिषितम्। तदीयशिरसि विद्यमानमस्तिष्कं मनुष्यमस्तिष्केन सदृशं न वेति।

पण्डितः – तथा तेषां दर्शनं कथं वा भविष्यति।

पशुशास्त्रज्ञः – तस्मै क्लोरोफारं प्रदाय शस्त्रैः तन्मस्तिष्कं व्यादाय परिशीलनीयम्।

पण्डितः – कथम्, शस्त्रप्रयोगोऽपि। क्लोरोफारं तदीयदेहं न प्रविशेदिति मन्ये। अन्यच्च तेन प्राणापायोऽपि भवेत्। स चेदस्मद्देशे कश्चित्कालं तिष्ठेत्तदा "तस्य देशः कः? स कः?" इत्यादिकं ज्ञातुं शक्यते। तन्मुखात् केचन अपूर्वविषयाः अभिव्यक्ताः भविष्यन्तीति भावयामि। तदीयमगाधं ज्ञानमविगणय्य तदीयशरीरावयवान् परिशीलयामः। तेन कि

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानाभिवृद्धिः भविष्यतीति किमर्थं भवन्तः विभावयन्ति। वस्तुतः तदीयं ज्ञानं मनुष्यज्ञानादपि अत्यन्तं विलक्षणं दृश्यते। अतः तदीयमस्तिष्कं मनुष्यमस्तिष्कादपि अत्यन्तं भिन्नमेव स्यात्। तस्य कण्ठबिलमपि तथ्यमेव बृहत्। तस्य ग्रीवां किं नावालोकयत। अश्वग्रीवेव सा बंहीयसी। जिह्वा, दन्ताः अपि स्थूला एव भवेयुः। नो चेत् भाषणसमये तन्मुखात् वाँय् इति तथा ध्वनिः नोदीयात्। समीपे स ध्वनिः स्फुटं न श्रूयते। विषयेऽस्मिन् परिशोधनमनावश्यकमिति ममाभिप्रायः।

भाषाशास्त्रज्ञः – भवतामस्माकञ्च प्रधानविषयेषु महान् भेदोऽस्ति। भवन्तः सर्वमनुमानेन साधयितुं यतन्ते। वयं तु साक्षात् प्रयोगमुखेन प्रत्यक्षणीयमिति भावयामः। भवद्भिः अनुमितः विषयः कदाचित् यथार्थः न भवेदपि। परन्तु अस्माभिः परिशोधनया स्फुटं प्रत्यक्षितः विषयः सर्वथा यथार्थ एव भवेत्।

पण्डितः – वयमनुमिनुमः इत्युक्तौ न खलु यतः कुतश्चित् अनुमिनुमः। किन्तु कमपि हेतुं पुरस्कृत्यैव खलु अनुमिनुमः। यैः हेतुभिः स विषयः अनुमीयते ते चेत् हेतवः दुष्टाः तदा साध्यं न सिध्यति। अत्र दोषं दर्शयन्तु भवन्तः। दोषसम्भावनं भवत्प्रयोगविषयेऽपि समानमेव। भवन्तः यं कमपि विषयं परिशीलयन्ति। तत्र कदाचित् साकल्येन परिशोधनं न घटेत चेत् तदा याथार्थ्यपरिज्ञानस्य भङ्गः अवश्यं भवत्येव।

In Public domain. Digitization Muthulakshmi Research Academy

यदा स पण्डितः एवं विवदितुमारेभे तदा भाषापशुशास्त्रज्ञौ "भवतः अस्माकञ्च मध्ये महान् अभिप्रायभेदः विद्यते" इत्युक्त्वा तं वादं तावता परिसमाप्य ततः निर्जग्मतुः। पण्डितः हाहू समीपं जगाम। भाषापशुशास्त्रज्ञौ एकत्र समुपविश्य सम्भाषितुमारभेताम्। क्लोरोफारं प्रदानपर्यन्तमैकमत्यं प्रदर्शयताम्। क्लोरोफारं प्रदानानन्तरं पशुशास्त्रज्ञः शिरः व्यादाय मस्तिष्कं परीक्षिष्यते। भाषाशास्त्रज्ञः मुखावयवान् परीक्षिष्यते। अतः क्लोरोफारं प्रदानाय प्रयतितव्यमिति तौ निरचिनुताम्। विषयमिमं तस्मै मृगाय अनिवेद्यैव स्वचिन्तितं निर्वर्तयितुमैहेताम्। स पण्डितः तत्र गत्वा कथयेद्वा इति च अबिभ्यताम्। परन्तु तस्य पण्डितस्य मृगविषये महान् गौरवभावः विद्यते। अतः गौरवहानिरिति कृत्वा सः तदा न कथयेदित्यपि व्यभावयताम्।

अथ प्रथमतः तन्निवासगृहं परिशीलनीयमिति विचिन्त्य तत्र गत्वा तत् पर्यशीलयताम्। द्वित्रदिनानि अहोरात्रं निद्रामपि विहाय तेन मृगेण क्रियमाणाः क्रियास्सर्वाः पर्यशीलयताम्। स मृगः रात्रौ द्वितीययामे द्विघण्टापर्यन्तं नेत्रे निमील्य निद्राण इव शेते। स समयः स्वचिन्तितकार्यनिर्वहणाय अनुकूल इति तौ व्यभावयताम्। प्रतिदिनं तत्र सर्वोऽपि व्यवहारः यथापूर्वमेव प्रचलतिस्म। जनाः आगच्छन्ति। मृगं दृष्ट्वा गच्छन्ति च। पण्डिताः समागच्छन्ति। तेन सह भाषन्ते। भाषापशुशास्त्राज्ञावपि समागच्छतः। इतस्ततः पश्यतः, किमप्यालोचयतः, गच्छतश्च।

तदनु पञ्चदशसु दिनेषु व्यतीतेषु एकस्यां रात्रौ यामद्वयसमये पञ्चाशता परिचारकैस्सह निश्शब्दं तौ शास्त्रज्ञौ हाहू भवनमागच्छताम्। पिपीलिकास्पन्दनेऽपि तौ उद्विग्नौ भवतः। अथ तेष्वेकः समागत्य तालिकां (Lock) निश्शब्दम् उदघाटयत्। त्रिचतुरेभ्यः दिनेभ्यः सा तालिका तैः तैलेन सिच्यते। अतः सा न क्रीञ्चकार। ततः षट्पुरुषाः अन्तःप्राविशन्। तदा तालिकया बबन्धुः। अन्ये आयसशलाकाभ्यः बहिः स्थित्वा नलिकाः

In Public domain. Digitization Muthulakshmi Research Academy

सज्जीकृत्य प्रतीक्षन्ते स्म। अन्तः प्रविष्टाः षट्पुरुषाः नलिकाः सन्नह्य जागरूकतया तत्समीपं जग्मुः। तस्मिन्समये हाहूः तेषामदृष्टवशादिव हस्तद्वयं निजोदरमध्ये निक्षिप्य स्वपिति स्म। तेषु द्वौ निमेषान्तरमात्रेण बृहत्या आयसशृङ्खलया तस्य हस्तौ पादौ च बबन्धतुः। सा श्रृङ्खला अत्यन्तं द्रढिष्ठा। द्रढीयसीभिः अयस्तन्त्रीभिः निर्मिता। पञ्चविंशतिमनुष्यबलयुक्तोऽपि तां छेत्तुं न प्रभवति।

आयसशृङ्खलाबन्धनानुपदमेव हाहूः नेत्रे उदमीलयत्। तत्क्षणं दश वैद्युतदीपाः तन्नेत्राभिमुखं प्रसारिताः। सः निश्चलं तान् सर्वान् अपश्यत्। अनुपदमेव तस्मिन् शयनागारे महान् प्रकाशः व्याप्नोत्। तस्मिन् एकः पण्डितः अवालोक्यत। सः हाहूकर्णान्तिके एवमुदजूघुषत् – "भवदीयहस्तयोः पादयोश्च शृङ्खलाः अर्पिताः। यदि त्वं चलसि तहि त्वामेते निहनिष्यन्ति। शास्त्रार्थपरिशोधनाय किमपि मोहजनकमौषधं भवते दास्यामः। त्वमेकद्वाघण्टापर्यन्तं मोहगतः भविष्यसि। भवदीयप्राणानामपायः न भविष्यति। अतः भवान् यदि न प्रतिघटते तदा भवदीयमस्मदीयञ्च गौरवमक्षतं भविष्यति" इति।

अनुपदमेव द्वौ वैद्यौ तत्समीपं गत्वा तस्मै क्लोरोफारं दातुमारभेताम्। हाहूः तारके भ्रामयन् सर्वान् अवालोकयत्। पार्श्वे नगराध्यक्षः स्थितोऽभूत्। स मृगः तत्क्षणमजानात् अधिकारिणामनुमत्यैव तत्सर्वं तथा प्रचलति इति। सः अनुपदमेव नेत्रे न्यमीलयत्। वैद्यौ क्लोरोफारं प्रवेशयतः। एकः वैद्यः नाडीं परीक्षते स्म। पञ्चदशनिमेषानन्तरं तस्य स्मृतिरस्ति वा नवेति पर्यैक्षन्त। हाहूः नेत्रे पुनः उदमीलयत् । ततः पञ्चदशनिमेषाः व्यतीताः। तस्य स्मृतिः अपगता स्यादिति पुनः पर्यैक्षन्त। हाहूः पुनर्नेत्रे उन्मीलयामास, एवमयं व्यवहारः एकघण्टापर्यन्तम् निर्व्यूढः अभवत्। हाहूः पुनः नेत्रे उन्मील्य पश्यन्नेवासीत्। तेषु भाषाशास्त्रज्ञः एवं समशेत– "स मृगः वायुं निरुन्धानः स्याद्वा" इति।

In Public domain. Digitization Muthulakshmi Research Academy

क्लोरोफारं पेटिकामपसार्य नासाग्रे अङ्गुली न्यक्षिपन् । श्वासः न प्रचलति। वैद्य एकः हृदयं पर्यशीलयत्। तन्न स्पन्दते। नाडीं पर्यैक्षत। सापि न चलति। अतः तस्य कृत्रिमश्वासः कल्पनीयः इति ते व्यभावयन्। हन्त प्रमादोऽयमिति केचिदमन्यन्त। एवं तेषु सर्वेषु बिभ्यत्सु हाहूः नेत्रे उदमीलयत्। सर्वेऽपि आश्चर्यमाप्नुवन्। वैद्याः हृदयं नाडीं च पुनः पर्यशीलयन्। तयोर्द्वयोरपि स्पन्दनं नासीत्। हाहूस्तावत् निर्निमेषः आसीत्।

7

वैद्याः नगराध्यक्षश्च किमप्यालोच्य तदीयहस्तयोः पादयोश्च शृङ्खलाः निस्सार्य बहिर्निरगच्छन्। नलिकाः सज्जीकृत्य बहिः सावधानं तिष्ठन्तः पञ्चाशत् सैनिका अपि तैस्सह निर्जग्मुः। शास्त्रज्ञौ वैद्यौ च एकत्र समुपविश्य तदनन्तरकर्तव्यमालोचयितुमारभेताम्। फ्रेञ्च् शास्त्रज्ञः स्वाभिमतसाधने निराशोऽभूत्। जर्मन् शास्त्रज्ञस्तु नाद्यापि निराशः।

जर्मन् शास्त्रज्ञः – यदि तस्मिन् जाग्रत्येव तदीयं शिरः व्यादाय मस्तिष्कं गृहीत्वा परिशीलयामः तर्हि कथन्नु भवेत्?

वैद्यः – तथा करणं प्रमादावहं खलु। यदि सः म्रियेत।

जर्मन् शास्त्रज्ञः – अद्यापि भवतः सः मानवः इति भ्रमः अस्ति वा।

वैद्यः – मानवो वा न वा इति अद्यापि न ज्ञायते खलु। मया ग्रीक् मैथालजी पठिता। हिन्दू मैथालज्यामपि केचन ग्रन्थाः पठिताः। ईदृशजन्तूनामवस्थितिः तेषु ग्रन्थेषु दृश्यते। परन्तु ते सर्वेऽपि विषयाः कल्पिताः इति व्यचिन्तयम्। ग्रीक्पुराणेषु श्रूयमाणानां मिनिटार् प्रभृतीनां जन्तूनामपि प्राणाः भवन्ति। ग्रीक्वीराः तान् निघ्नन्ति स्म। प्राणवायुः प्रचलति चेत् तादृशं जन्तुं निहन्तुं शक्नुमः। हृदयस्पन्दनेन नाडीचलनेन च

In Public domain. Digitization Muthulakshmi Research Academy

प्राणसत्तां निश्चिनुमः। अद्य पुनरस्मिन् एते विषयाः परस्परं विरुद्धाः दृश्यन्ते। हृदयं नाडी च न चलतः। स तावत् जीवति। नेत्रे उन्मील्य पश्यति। अतः न मे किञ्चिदपि प्रतिभाति।

फ्रेञ्च् शास्त्रज्ञः – उपायस्यैकस्य अवलम्बने सामीचीन्यं भवेदिति तर्कयामि। विषयमिमं सर्वं तस्मै कथयित्वा "परिशोधनीयोऽयं विषयः, न ते प्राणानाम् अपायः भविष्यति। त्वया अवश्यमङ्गीकर्तव्यम्। एकघण्टाभ्यन्तरे पुनः तव स्मृतिः भविष्यति" इति यद्यङ्गीकारयिष्यामः।

पण्डितः – परन्तु तदीयशरीरे सञ्जाते क्षते अस्मदीयैः औषधैः न शान्ते किल। एवञ्च वयं केवलं तच्छरीरे क्षतकारिण एव भवेम। अन्यच्च तदपि क्षतं शिरसि क्रियते। व्रणशामकाः यदि न भवेम?

जर्मन् शास्त्रज्ञः – यदि नाङ्गीकरिष्यति तदा अन्यः उपायः अवलम्ब्यते। अग्निनलिकाः प्रदर्श्य "यदि त्वं नाङ्गीकरिष्यसि तदा एताभिः त्वां धक्ष्यामः" इति कथयित्वा अनुपदमेव नलिकया कमपि जन्तुं निर्दह्य तं भीषयिष्यामः। तथाचेत् अङ्गीकरिष्यतीति भावयामि।

वैद्यः – द्वावप्युपायावेव। श्वः पृष्ट्वा द्रक्ष्यामः।

एवं निश्चित्य सर्वे स्वस्वभवनमगच्छन्। परेद्यवि प्रातः हाहूं द्रष्टुं ते समागच्छन्। हाहूः प्राणायामे निष्ठितोऽभूत्। किमिति अस्मिन् दिने अयं प्रातरेव प्राणायामाय उपक्रान्तवान् इति ते विसिष्मियिरे। आसूर्यास्तमयं सः नेत्रे नोदमीलयत्। चिरं स्थित्वा तत्र ते निरुत्सुकाः निर्ययुः।

In Public domain. Digitization Muthulakshmi Research Academy

पुनः परेद्युः प्रातरेव आगच्छन्। सः समाधावेव आसीत्। रात्रौ सः अशेत वा इति तत्रत्यान् रक्षकभटान् अपृच्छन्। ते तथैवोपाविशत् इति प्राहुः। एवं पञ्चदशदिनानि व्यतीतानि। अथ एकस्मिन् दिने कस्यचित् पुरुषस्य हाहूपश्चाद्भागमार्गेण गमनमापतितम्। हाहूपृष्ठभागे सूक्ष्मपक्षसमुदायसदृशं किमपि पुञ्जीभूततया समभिवृद्धमभूत्। पार्श्वभागात् प्रेक्षणे तद्वाह्वोः पश्चात् स्थिते क्षते नाद्य दृश्येते। गरुत एते कुत इति ते सर्वे व्यस्मयन्त। पञ्चदशदिनेभ्यः जनानामयश्शलाकाशालाभ्यन्तरे गमनागमनादिकं निरुद्धमभूत्।

अथ दशमे दिने हाहूः नेत्रे उन्मील्य "तत्र भवन्तः कुत्र वर्तन्ते" इति आचुक्रोश। तदा सः किमपि भाषते इति ज्ञात्वा तत्रत्याः रक्षकभटाः नगराध्यक्षसमीपं गत्वा न्यवेदयन्। सोऽपि पण्डितानाह्वापयत्। पण्डिताः समागच्छन्। हाहूः आच्छादनाय द्वे राङ्कवे अपृच्छत्। अनुपदमेव सुविशाले द्वे राङ्कवे समापतिते। एकैकमपि राङ्कवं नवपदविस्तृतं पञ्चदशपदव्यायतं शुक्लं सुसूक्ष्ममश्चलेषु स्यूतञ्च समभवत्। तत्रत्याः ते द्वे अपि तस्मै प्रादुः। तयोरेकेन सः स्वशरीरमाच्छादितवान्। अथ सः पण्डितान् एवं प्राह – "अद्य मया स्नातव्यं, तावत्पर्यन्तमत्र न केनापि स्थातव्यम्। नो चेत् स्नानप्रदेशस्य किमप्यन्तर्धायकं परिकल्प्यताम्" इति। तस्य तद्वचनं सर्वान् व्यस्मापयत्। युक्तमित्येव नगराध्यक्षः अचिन्तयत्। सत्यमेवायं हाहूः नागरिकः। नो चेत् स्नानशालां कुतः अभ्यर्थयते इति च मेने। तत्क्षणमेव कान्यपि छादकानि आनाय्य स्नानशालायाः चतुर्षु पार्श्वेषु तिरः न्यवेश्यन्त। हाहूः तदन्तः प्रविश्य स्नात्वा बहिरागत्य "फलान्यानाययत" इति प्राह। फलान्यानीयन्त। सः दिवा भाषते। किन्तु रात्रिषु न शेते। उपविष्ट एव प्राणायामं करोति। विषयमिमं सर्वेऽपि जाग्रत्तया पर्यशीलयन्। फ्रेञ्च् जर्मन् शास्त्रज्ञौ तु रात्रिषु तथा तदशयनस्य कारणं तस्मै क्लोरोफारम् प्रदानाय स्वीकृतः प्रयत्न एवेति अमन्येताम्।

In Public domain. Digitization Muthulakshmi Research Academy

एवं स्थिते सप्ताहादनन्तरं तत्पृष्ठभागे किमपि समुन्नततया प्रत्यभात्। प्रथमं तत् राङ्कवलयः इति चिन्तितवन्तः। दिने दिने तत् प्रवर्धमानमासीत्। तस्मिन्नुपविष्टे सति स्वर्णपक्षाः पर्यास्तृता इव अदृश्यन्त। सः सर्वलोकप्रबोधात् पूर्वमेव स्नात्वा प्राङ्गणे समुपविशति। तयैव विधया आसायमुपविष्टो भवति। पूर्वं फलानि भक्षयन्नासीत्। अद्य तान्यपि तत्याज। सूर्यास्तमयानुपदमेव किञ्चिदिव चलित्वा पद्मासनं विधाय प्राणानायन्तुमारभते।

एकस्मिन् दिने मध्याह्नसमये तौ शास्त्रज्ञौ वैद्याभ्यां पण्डिताभ्याञ्च सह तत्समीपं गत्वा तदग्रे समुपाविशताम्। हाहूः द्वितीयं राङ्कवमपि गृहीत्वा सर्वमपि स्वशरीरं समाच्छादयत्। तदीयमुखं विना अन्यत् किमपि नावलोक्यते। शास्त्रज्ञयोरभिप्रायं पण्डितौ संस्कृतभाषया निवेदयतः। "आर्य! एतस्य जन्मभूमिः जर्मन् देशः। अयं भाषाशास्त्रवेत्ता" इति पण्डिते वदत्येव हाहूः भाषाशास्त्रं नाम किमिति पप्रच्छ।

पण्डितः – भाषा प्रथमं कथं समजायत। कस्याः भाषायाः काः काः भाषाः सञ्जाताः इत्यादिविषयाणां भाषाशास्त्रं बोधकम्।

हाहूः – (विहस्य) सर्वासां भाषाणां संस्कृतभाषैव प्रभवहेतुः। तदा एषा विचारणा नाम किं प्रकारा?

पण्डितः – प्रथमं इण्डो यूरपियन् भाषेति काचिदासीत्। तस्याः संस्कृतभाषा सञ्जातेति अस्मदीयभाषातत्त्व-परिशोधनेन निश्चितमित्याह। हाहूः विहस्य तदनु कथ्यतामिति प्राह।

पण्डितः – अयं द्वितीयः फ्रेञ्च् देशस्थः। पशुशास्त्रवेत्ता। एतौ द्वावपि स्वस्वशास्त्रयोः अत्यन्तं निष्णातौ। एतयोः

In Public domain. Digitization Muthulakshmi Research Academy

भवद्विषये कश्चन सन्देहः वर्तते। तदपनोदनाय अत्र समागतौ।

हाहूः – क एष कथ्यताम्।

पण्डितः – यथा ते रोचते। क्षन्तुमर्हति तत्र भवान्। भवत्कबन्धं मानवावयवघटितं दृश्यते। शिरस्तु हयस्य। अश्वादयः पशवः। तेषां मानवानामिव विज्ञानं वा उच्चारणसौलभ्यं वा न भवति। भवच्छिरः अश्वशिरस्सदृशं वर्तते। अतः तस्मिन् विज्ञाननिदानं मानवमस्तिष्कं कथं वर्वर्तीति अयं पशुशास्त्रज्ञः सन्देग्धि। दन्ततालवादयः भवदीयमुखान्तरवयवाः घोटकमुखान्तरावयवकल्पाः किल। तत्कथं भवन्मुखात् मनुष्यस्येव उच्चारणं भवतीत्येवं जर्मन् पण्डितस्य सन्देहः। एतादृशसन्देहनिवारणाय एतौ द्वावपि भवते किमप्यौषधं दत्त्वा स्मृतिमपोह्य मस्तिष्कादिकं शस्त्रैः विदार्य परीक्षिष्येते। वस्तुतत्वपरिज्ञानाय अयं श्रमः। अतः भवता अवश्यमङ्गीकर्तव्यमिति एतौ मन्मुखेन निवेदयतः।

हाहूः – यदि मया नाङ्गीक्रियते तदा किं करिष्यन्ति।

जर्मन् शास्त्रज्ञः – बलादङ्गीकारयिष्यन्ति।

हाहूः – किमयं कथयति इति पण्डितमपृच्छत्। पण्डितः तत् संस्कृतभाषया अकथयत्।

हाहूः – विषयः एकः परिज्ञायताम्। भवतां मनस्सु ईदृशाः क्षुद्राः ऊहाः कथं वा जायन्ते इति ममापि अस्ति संशयः। ईदृशक्षुद्रोहाजनकं भवतां मस्तिष्कं

In Public domain. Digitization Muthulakshmi Research Academy

कीदृशमित्यपि परिशीलनीयमस्ति। मया किं कर्तव्यम्?

पण्डितौ वाक्यान्येतानि तदीयभाषया ताभ्यामकथयताम्। तौ परस्परं मुखे अवालोकयतः। किं समाधेयमिति च नाजानीताम्। अथ कञ्चित् कालमितस्ततः चरित्वा तौ स्वस्वमार्गेण निर्जग्मतुः। तदा पण्डितः प्राह "अस्मद्देशेषु नूत्नविषयजिज्ञासा अत्यन्तमधिका। अस्मद्देशीयाः खण्डान्तराण्यापि गत्वा तत्रत्यान् विषयान् ज्ञात्वा लिखन्ति" इति।

हाहूः – किमर्थं तथा करणम्, सृष्टिः विभिन्नप्रकारेति किं भवन्तः न जानन्ति। सृष्टौ विभिन्नस्वभावाः जन्तवः भवन्ति। जन्तुषु विविधेषु सत्सु तेषां स्वभावा अपि विविधा एव भवन्ति। एवं विविधजातीयानां मानवानाम् अपि आचाराः विविधाः भवन्तीति सुखेन ज्ञातुं शक्यते। प्रथमं केषाञ्चन विचित्रमृगाणां दर्शनेन आश्चर्यं भवति चेत् भवतु। परन्तु तदज्ञानकार्यम्। शास्त्रपरिज्ञानानन्तरं बुद्धौ परिपक्वायां न किमपि आश्चर्यजनकं भवति। अन्यच्च यः कोऽपि विषयः सम्यक् ज्ञातश्चेत् तन्मुखेन अनेकविषयाः अभ्यूहितुं शक्यन्ते। यं वयमभ्यूहामहे पश्चात् तस्य साक्षाद्दर्शनेऽपि नैव आश्चर्यं भवति। वस्तुतत्वे एतावन्मात्रे सति परिशोधनेति शरीरविदारणमिति किमर्थं कथयन्ति। अन्यच्च सम्यगालोच्य एकाग्रचित्ततया विषययाथार्थ्यं ज्ञातुं भवन्तः न प्रभवन्तीति मन्ये। साक्षात् शरीरमुखेन परिशील्य कियदिति ज्ञानं सम्पादयिष्यन्ति। यदि

In Public domain. Digitization Muthulakshmi Research Academy

एकाग्रमनस्कतया समालोच्यते तदा तत्सम्बन्धी विषयः परिज्ञायेत किल।

एषां वचनानामभिप्रायः पण्डितैः नाबुध्यत। ते बहिरागत्य तद्भाषितं सर्वं तत्रत्येभ्यः अकथयन्। परेद्युः एते विषयाः पत्रिकासु अदृश्यन्त। तत्पठनानन्तरं यूरप्देशीयाः तत्वज्ञास्सर्वेऽपि अश्वमुखस्यास्य मेधाविशेषमधिकृत्य समालोचयितुमारभन्त। बहवः तद्दर्शनार्थं लण्डन् नगरं प्रस्थिताः। हाहू सह वादं कर्तुं पण्डितानां शास्त्रज्ञानाश्च किमपि नाभात्। एतैः उच्यमानं सर्वं स अल्पेन एकेन वाक्येन पराकरोति। लण्डन् नगरे सः विचित्रजन्तुः इति प्रवादः नाद्य श्रूयते। वादकुशलस्सः इति प्रचारः आश्चर्यजनकः सर्वत्र श्रूयते।

8

एकस्मिन् दिने भाषापशुशास्त्रज्ञौ एकत्र उपविश्य आलोचयितुमारभेताम्।

पशुशास्त्रज्ञः – मृगोऽयं नास्माकं वश्यो भविष्यतीति प्रतिभाति। किं कुर्म एतम्।

जर्मन् शास्त्रज्ञः – आवाभ्यां प्रथममालोचितः उपाय एव समीचीनः। तत्समक्षं कमपि महान्तं महिषं वृषभं वा नलिकया निहत्य तत्प्रदर्श्य भीषयित्वा तं वशीकरिष्यामः।

पशुशास्त्रज्ञः – तर्हि विषयमिमं नगराध्यक्षाय निवेद्य वैद्यैः सह गत्वा प्रयतिष्यावहे।

एवं विचिन्त्य तौ द्वावपि नगराध्यक्षाय स्वाभिप्रायं न्यवेदयताम्। स एवं प्राह–नलिकया हननेन प्राणिनः मरिष्यन्तीति पूर्वमेवास्माभिः तस्मै ज्ञापितम्। तदागतप्रथमदिवसेषु एकदा सः कस्यचन सैनिकस्य हस्तात् नलिकामाचकर्ष तदा वयं रिवाल्वरेण एकं शुनकं निहत्य दर्शयित्वा तत्करात् नलिकां

In Public domain. Digitization Muthulakshmi Research Academy

गृहीतवन्तः। पशुशास्त्रज्ञः "तथा चेत् सः इतः पूर्वमेव भीत इति वक्तव्यम्। स्तात्। अतः परं प्रयत्नमेतं करिष्यामः।"

अथ वैद्याः परिचारकाः शास्त्रज्ञाः सर्वेऽपि मिलित्वा हाहू समीपमगच्छन्। तस्मै एतत्सर्वमपि अकथयन्। भवता यदि नाङ्गीक्रियते तदा तव मान्यता नष्टा भवति। याथार्थ्यज्ञानाय वयं प्राणानपि न परिगणयामः। क्लोरोफारं नामकस्य औषधस्य अतिमात्रसेवने मानवः मरिष्यति न वेति ज्ञातुं कश्चन फ्रेञ्च शास्त्रज्ञः स्वयमेतदौषधमाघ्राय प्राणान् तत्याज। एवं बहवः शास्त्रज्ञाः अस्मद्देशेषु विज्ञानसमुपार्जनाय प्राणानाहुतीकुर्वन्ति। अतः भवता अङ्गीकर्तव्यम्।

हाहूः – एवं प्राणत्यागेन मानवजातेः को वा लाभः समापतितः। पण्डितैः कथ्यमानानां विषयाणां पर्यालोचने भवद्देशेषु अज्ञानमेव अधिकतया दृश्यत इव। बहूनां व्याधीनामौषधान्येव भवद्देशेषु न सन्ति किल। अत्र बहवः जनाः विशूचिकादिभिः प्रतिवत्सरं विनश्यन्तीति श्रुतं मया। नैकोऽपि शतं वत्सरान् जीवति। न कोऽप्यत्र तपश्चरति। ज्ञानं तपसा भवति। न तु जन्तुशरीराणां विदारणेन।

पशुशास्त्रज्ञः – न वयमत्र भवता विवदितुमागताः। यदि भवान् अस्मदुक्तप्रकारेण न वर्तिष्यते तदा अनया नलिकया त्वां निहत्य तव स्मृतिमपोह्य पश्चात् परिशोधयिष्यामः। अतः अलोच्यताम्।

हाहूः – भवद्देशे सर्वस्यापि जनस्य स्वातन्त्र्यमस्तीति परह्यः एकः पण्डितः प्राह। तादृशं स्वातन्त्र्यं किं भवद्देशीयानामेव वा? इतरदेशेभ्यः समागतानां

In Public domain. Digitization Muthulakshmi Research Academy

तादृशं स्वातन्त्र्यं न भवति किम्? अहमपि भवादृशः। अतः ममाप्यस्ति स्वातन्त्र्यम्। मच्छरीरे भवद्भिः करिष्यमाणां परीक्षां नाहमङ्गीकरिष्यामि। अङ्गीकारे अहं स्वतन्त्र इति कथम्?

तच्छ्रुत्वा तत्रत्याः सर्वेऽपि शिरांसि अनामयन्। पशुशास्त्रज्ञः इत्थं प्राह – स्वातन्त्र्यं मानवानामेव न तु पशूनाम्। भवांस्तु पशुः नातस्ते स्वातन्त्र्यं वर्तते।

हाहूः – वयं सर्वेऽपि पशव एव। तिरश्चां मानवानाञ्च ज्ञानेनैव भेदः। मनुष्याणां यावत् ज्ञानं न तावत् पशुषु दृश्यते। अतः तयोः भेदः ज्ञानेनैव निर्णेयो भवति। भवतामिव ममापि ज्ञानं विद्यते। अतोऽहं भवत्समानतयैव भवद्भिः सम्भावनीयः।

पशुशास्त्रज्ञः – निर्णयेऽस्मिन् न केवलं ज्ञानमेव साधनम्। किन्तु आकारोऽपि।

हाहूः – ममायमाकारः। मदीयश्च ज्ञानमीदृशम्। पूर्वं भवता ईदृशाकारस्य ईदृशज्ञानस्य च सामानाधिकरण्यं न दृष्टम्। परन्तु अद्य मयि तयोः समन्वयः दृश्यते। तत्कथं नाङ्गीकरोषि। कथमहमेक एव पशुर्भवामि। प्राणिनस्सर्वेऽपि पशव एव।

पशुशास्त्रज्ञः – वयमत्र बलाधिकाः। भवानस्मद्देशमागतः। अतः अस्मदभीष्टानुरोधेन भवता वर्तितव्यम्।

हाहूः – अहं कथमागतः। कुत आगतः इति इमं विषयं यदि भवन्तः वक्तुं प्रभवन्ति तदा भवतामहं वश्यो भविष्यामि।

In Public domain. Digitization Muthulakshmi Research Academy

इतः परं वादोपवादैः न किमपि प्रयोजनमिति सभ्रूसंज्ञं निश्चित्य सर्वे बहिरागत्य कवाटं पिधाय तालिकां समाघटयन्। नलिकाभिः अग्निगुलिकाः तदीयहस्तयोः पादयोश्च क्षेप्तुं सैनिकान् आज्ञापयन्। सैनिक एकः नलिकामौष्णापयत् (Fired)। अग्निगुलिका हाहूवामबाहुमूलं प्रविश्य निर्जगाम। तदा तेन समाच्छादितं राङ्कवं दग्धं छिद्रितं चाभवत्। परन्तु सः बाधां नानुभवति स्म। पुनः नलिकामौष्णापयत्। अग्निगुलिका दक्षिणबाहुमूलमाजघान। एवमग्निगुलिकापङ्क्तयः दशवारं प्राक्षिप्यन्त। यत्र यत्र ताभिः घातो भवति तत्र तत्र राङ्कवे रन्ध्राणि जायन्ते। गुलिकाः तदीयशरीरं प्रविश्य पश्चात्तः निस्सरन्ति। सः किञ्चिदपि न चलति। परन्तु किञ्चित् बाधां अनुभवन्निव अभिनयति स्म। सैनिकाः अग्निगुलिकाक्षेपात् क्षणं व्यरमन्त। सः अनुपदमेव चलित्वा पद्मासनेन उपविश्य प्राणान् आयन्तुमारभत। पञ्चनिमेषानन्तरं सैनिकाः पुनरपि नलिकाः औष्णापयन्। अथ गुलिकाः तच्छरीरमाहत्य भूमौ पतितुमारेभिरे। अधः पतिताः ताः निर्भग्नास्सत्यः प्रज्वलन्ति स्म। तादृशज्वालानां मध्ये एव सः उपविष्टः आसीत्। एवं विंशतिगुलिकाक्षेपणानन्तरं सः किमभवदिति प्रेक्षितुं ते अन्तः प्राविशन्। परितः पतितानां गुलिकानां ज्वालाः समशमयन्। तच्छरीरोपरि विद्यमानं राङ्कवं दग्धमभवत्। परन्तु तत्पृष्ठदेशात् द्वौ सुदीर्घौ पक्षौ लम्बेते। तौ सुवर्णसच्छायौ विराजेते। हाहूः नेत्रे विस्फार्य कोपेन तानपश्यत्। अन्तः विद्यमानास्सर्वेऽपि ततस्ततः पलायन्त। स पुनः कञ्चित्कालं नेत्रे निमील्य पुनरपि उदमीलयत्। भयात् दूरं गताः जनाः पुनः तत्समीपं गताः। पूर्वं कवाटमबद्ध्वा पलायितः सैनिकः कवाटं बबन्ध। हाहूः स्वराङ्कवयोः दाहेन पुनः चत्वारि राङ्कवानि आवश्यकानीति तेभ्यः न्यवेदयत्। नगराध्यक्षः तानि आनाययितुं यावत् उदयुङ्क्त तावदेव शास्त्रज्ञौ न्यषेधिष्टां, यदि अयमस्मदीयपरिशीलनमङ्गीकरिष्यति तदा दास्यामः इति च प्रोचतुः। नगराध्यक्षः पण्डिताश्च तन्न युक्तमित्युक्त्वा राङ्कवानि आनाय्य प्रादुः। कश्चन

In Public domain. Digitization Muthulakshmi Research Academy

वैद्यः प्राह – कदाचित् अयमेव कालान्तरे अङ्गीकुर्यात्। कश्चित्कालं वयमपि प्रतीक्षिष्यामहे इति।

अत्र एवं स्थिते सैनिकेषु महान् कोलाहलः उदभवत्। प्रथममस्माभिः क्षिप्ताः पञ्चविंशतिः गुलिकाः तच्छरीरमाहत्य अधो न्यपतन्। अद्य वयं सर्वेऽपि अदृष्टशालिनः। अत एव सः नास्मान् मारयितुमागतः। यदि तथा सः आगमिष्यत् तदा वयं सर्वेऽपि अपूपिका इव चूर्णिता एव अभविष्याम इति अचिन्तयन्। तदारभ्य तत्समीपगमनं सैनिकानामतीव भयकारणमासीत्। तेषु केचिदवदन् "सः नास्मान् किमपि करिष्यति। यद्यकरिष्यत्तर्हि पूर्वमेव अकरिष्यत्। अतः नास्ति तस्मात् भयम्। तद् गच्छामः तत्समीपम्" इति। भयमस्तु वा मा वा। यतः वयं राजसेवकाः ततः अस्माभिः अवश्यं गन्तव्यमित्युक्त्वा पुनरपि ते तत्समीपमगच्छन्। नलिकाभिः किमपि प्रयोजनं नास्ति खलु। तत्समीपं गच्छतामस्माकं नलिकाभिः किं प्रयोजनम् इति केचिदपृच्छन्। प्रयोजनाभावेऽपि लाञ्छनत्वेन धार्या एवेति मत्वा ताः गृहीत्वैव प्रातिष्ठन्त। पुनः हाहूं भटाः रक्षन्ति स्म।

दशदिनानि व्यतीतानि। तद्विषये कृतः द्रोहः उपशान्तप्रायः आसीत्। पुनः पण्डिताः आगच्छन्ति गच्छन्ति च। एकस्मिन् दिने द्वावपि शास्त्रज्ञौ तत्समीपमगच्छताम्। सः तौ विलोक्य प्रत्यभिजानान इव जहास। तयोः प्राणाः उदडयन्त। हाहूः पण्डितानवलोक्य प्राह – "इतः पश्यत एतौ द्वावपि मां विलोक्य मृग इति मन्येते। परन्तु न केवलमहं मृग एव। किन्तु विहङ्गमोऽप्यस्मि" इत्युक्त्वा समुत्थाय राङ्कवं व्यपनीय पूर्वं सूक्ष्मपक्षसमुदायत्वेन स्थितं स्वपृष्ठभागं विस्तार्य सुविपुलौ द्वौ पक्षौ व्यधूनयत्। तत्पक्षधूननसञ्जनितवातप्रकम्पनेन तं परितः स्थिताः सर्वेऽपि प्रलयमारुतेनेव निर्धूताः भूमौ न्यपतन्। तत्पक्षस्पर्शेन परितः निखाताः आयसशलाकाः अभज्यन्त। तत्र सर्वत्र सुवर्णकान्तयः व्याप्नुवन्। परितः स्थिताः द्विशतं जनाः तं

In Public domain. Digitization Muthulakshmi Research Academy

निरीक्षितुमपि न प्राभवन् । सर्वोऽपि भीतस्सन् पश्चात् गतिरभूत्। हाहूः द्वित्राणि पदानि इतस्ततः विन्यास्यत्। तदा सा कुट्टिमभूमिः बलिष्ठतुरगखुरघट्टनेनेव खंग् खंग् इति प्रत्यध्वनत्। तच्छरीरं सर्वमपि सुवर्णमिव धगद्धगायमानमभूत् । सः उड्डयिष्यमाण इव अदृश्यत। यदा सः पक्षौ प्रसार्य उदतिष्ठत् तदा अष्टपदोन्नतः सः तालवृक्षप्रमाण इव व्यलोक्यत। पक्षप्रसारणेन हाहूः प्रसारितपक्षः पर्वत इव आभात्। प्रेक्षकाः जनाः तं विलोकयितुमप्रभवन्तः नेत्राणि न्यमीलयन् । केचित् भूमौ न्यपतन् । केचित् प्राकम्पन्त। केचित्तु व्यमुह्यन्।

अथ सः तौ स्वपक्षौ आकुञ्च्य राङ्कवेन आच्छाद्य उपाविशत्। परितः विद्यमानाः भीताः इति ज्ञात्वा मा भैष्ठ इति वदन्निव हस्तेन संज्ञाप्य स्वसमीपागमनाय तान् आजुहाव। भग्नाः आयसशालकाश्च सञ्चित्य एकत्र विन्यास्यत्। अद्य सः निरावरणप्रदेशे वर्तते। बहवः तत्समीपमगच्छन्। पुनः पण्डिताः तेन सह सम्भाषितुमारभन्त। सः शास्त्रज्ञानवलोक्य प्राह – "भुवि मनुष्याणां मृगाणां पक्षिणाञ्च लक्षणानि भिन्न भिन्नानि दृश्यन्ते। क्वचित्तु एतानि सर्वाण्यपि एकस्यामेव व्यक्तौ सम्भूय भवितुमप्यर्हन्ति। इदं शरीरमस्मत्सङ्कल्पानुसारेण विपरिवर्तते खलु" इति। अस्य भाषणस्य अर्थः न केनापि अवगतः आसीत्। अस्मत्सङ्कल्पानुसारेण विपरिवर्तते इत्यस्य कोऽर्थः इति ते समशेरत। तेषु द्वित्राः मोक्षमूलपण्डितस्य ग्रन्थान् अवलोकितवन्तः वर्तन्ते। तैः किञ्चिदिव एतेषां वाक्यानामर्थः ज्ञातः आसीत्। अथ तादृश्यां दशायां सूर्यः अस्तमगच्छत्। अतः सर्वेऽपि स्वस्वमार्गेण निरगच्छन्। आयसशलाकाभिः अनावृते बाह्यप्रदेशे हाहूः तां रात्रिमगमयत्।

9

तस्य नरतुरगस्य पक्षौ स्तः इति तौ च नवीनतया समुद्गताविति, तौ बलिष्ठाविति, तयोः स्पर्शेन आयसशलाकाः त्रुटिताः इति च पत्रिकासु प्राकाश्यत। नलिकाघाताः तं न व्यथयन्तीति पत्रिकासु पठित्वा आश्चर्यविद्धाः

In Public domain. Digitization Muthulakshmi Research Academy

जनाः अमेरिका यूरप् आस्ट्रेलिया केनेडा आफ्रिकादेशेभ्यः बृन्दं बृन्दं लण्डन् नगरमागच्छन्। प्रयाणपर्याप्तधनवन्तः सर्वेऽपि स्वीयाः नौकाः लण्डन् नगरं प्रति प्राचोदयन्।

नगराध्यक्षः तन्नगरपालकसभ्याः उद्योगिनश्च हाहूविषयं परिशीलयितुमेकत्र समुपाविशन्। सः न कस्मा अपि अपकरोति। अतः तस्य कारागारे निर्बन्धः नोचितः इति निरचिन्वन्। यः कोऽपि सम्पन्नः तं स्वभवनं नीत्वा मानयति चेत् वरम्। न चेत् प्रभुत्वातिथित्वेन परिगणय्य पार्लमेण्ट् भवने एव तस्य सर्वाणि सौकर्याणि परिकल्प्येरन् इति निश्चितवन्तः। परेद्यवि प्रातरेव सर्वेऽपि ते तत्समीपमगच्छन्। स्वीयमभिप्रायं तस्मै अश्रावयन्। श्रावितः विषयश्च अयम्।

"हे मृगपक्षिविलक्षण मानव! त्वमत्यन्तं साधुः। भवतः मनुष्याणामिव महद्विज्ञानं विद्यते। नासि त्वं क्रूरः। इतः पूर्वं भवद्विषयः नास्माभिः ज्ञातः। अतः कारागारे इयन्तं कालं निबद्धोऽभूः। न भवान् कस्मा अपि अपकरोतीति विश्वासः अस्माकं जातः। अतः भवन्तं कारागारात् विमोच्य अस्मदीयप्रभुत्वातिथित्वेन गृह्णीमः। भवदपेक्षितानि सौकर्याणि सर्वाण्यपि अस्मदीयप्रभुत्वधनेनैव सम्पादयिष्यामः। अत्र न भवन्तं कोऽपि किमपि कर्तुं प्रभविष्यति। अतः अस्मदीयं प्रभुत्वं भवद्रक्षणभारं स्वीचकार" इति।

वचनानीमानि संस्कृतपण्डिताः संस्कृतीकृत्य अश्रावयन्। श्रुत्वा सः प्रहस्य जगर्ज। अहो अल्पता मनुष्याणामिति। पण्डितास्सर्वेऽपि एतदशृण्वन्। वाक्यस्यास्य अर्थः पण्डितैरेव अबुध्यत। नान्यैः। तदनु तस्मात्प्रदेशात् हाहूं कस्यचन सम्पन्नस्य भवनं निन्युः। तत्र सः राजभोगान् अनुभवति स्म।

अथ जनेषु विवादाः उदभवन्। किमर्थं तस्य तौ पक्षौ स्तः। सः किं ताभ्यां डयते? उड्डीय गच्छेत् चेत् किं कर्तुं शक्यते। दिवा गच्छति चेत् विमानैः अनुगन्तुं शक्यते। अतः कारागारात् विमोकोऽस्य न युक्तः इति केचित्। को वा

 In Public domain. Digitization Muthulakshmi Research Academy

अस्य कारागारः तदीयपक्षास्फालनेन आयसशलाका एव निर्भग्नाः आसन्। नलिकाक्षेपानपि सः नागणयत्। स एव स्वाभिमतानुसारेण अत्राऽस्ते। नो चेत् को वा तं निरुन्ध्यात् इति अन्ये। एतौ पक्षौ अश्वशिरश्च चमत्काराय कृत्रिमतया सङ्घटितौ। न यथार्थौ । यदि पक्षौ यथार्थावेव भवतः तर्हि प्रथममेव किमर्थं नास्ताम्। अद्य पुनः कथं सञ्जातौ इत्यपरे। एवं ते बहुधा संशेरते स्म।

सम्पन्नस्य गृहप्रवेशादारभ्य हाहूः स्वस्य सुविशालं प्रकोष्ठकमेकमपैक्षत। तस्मिन् प्रविष्टं तमेकमासपर्यन्तं न कोऽपि सम्भाषयेत् इति सः नियममकरोत्। सः सम्पन्नः विषयमिमं सर्वेभ्यः अधिकारिभ्यः न्यवेदयत्। ते सुदीर्घमालोच्य ततः पूर्वं पञ्चदशदिनेष्विव प्राणानायम्य स्थास्यतीति मत्वा तत्प्रार्थनामङ्गीचक्रुः। स सम्पन्न एकस्मिन् सुमहति प्रकोष्ठके तस्य सौकर्याणि अकल्पयत्। हाहूः प्रकोष्ठकं प्राविशत्।

अथ मासो व्यतीतः। एकत्रिंशे दिने सः सम्पन्नः कवाटमघट्टयत्। हाहूः उत्थाय कवाटमुदघाटयत्। परन्तु तत्र प्रकोष्ठके न कापि व्यक्तिः अदृश्यत। सम्पन्नः भीत्या आचक्रन्द। हाहूः अनुपदमेव ज्ञात्वा अहमस्याः यवनिकायाः अभ्यन्तरे वर्ते इति वदन् बहिराजगाम। तदा सा यवनिका तत्र सम्पन्नस्य दृष्टिपथमगात्। पुनरपि यथा पूर्वं पण्डिताः प्रेक्षकाश्च गमनागमनादिकं कर्तुमारभन्त।

एकस्यां रात्रौ प्रधानमताचार्यः अन्ये दश आचार्याश्च समागच्छन्। ते तदीयं मतमधिकृत्य अपृच्छन्।

हाहूः – न मे किमपि मतमस्ति। मतं नाम किम्?

मताचार्यः – तथा नोच्यताम्। अस्ति किल ईश्वरः। तस्य कुमारः क्रीस्तः। तस्मिन् विश्वासेनैव मुक्तिः लभ्यते, न चेत् न।

In Public domain. Digitization Muthulakshmi Research Academy

हाहूः तान् सवैलक्षण्यमपश्यत्। नेत्रे क्षणं न्यमीलयत्। किमपि दध्यौ। तदनु ते शतं प्रश्नान् अपृच्छन्। सः तान् न समाधात्। अथ किञ्चित्कालानन्तरं हाहूः प्राह – "सामान्यजनस्य मतं न भवति। मतं महर्षिणामेव भवति। एकेन महर्षिणा प्रोक्ते मते कस्यचित् विश्वासः भवति। सोऽपि विश्वासः अल्पस्य पुरुषस्य अल्पः महतस्तु महान् भवति। अल्पशक्तिमति अस्मिन् लोके महाशक्तिमत्सु इतरलोकेषु वा सर्वत्र विद्यमानाः प्राणिनस्सर्वेऽपि एषणात्रयदूषिताः प्रायः भवन्ति। यः कामं विजित्य ब्रह्मपदं सेवते तस्य नास्ति ईदृशैः अल्पविषयैः प्रयोजनम्। मतमित्युक्तौ किमिति कथं ज्ञायते। प्रथमं जगतः नश्वरत्वं ज्ञायेत चेत् तेनैव अलम्" इति। तदनु किं प्रतिवक्तव्यमिति न कस्यापि अस्फुरत्। यथागतं सर्वे निर्जग्मुः।

एकस्मिन् दिने सायं स सम्पन्नः तेन सह विहाराय प्राचलत्। हाहूः सुमहति मोटार् शकटे समुपाविशत्। तमभितः पण्डिताः उपाविशन्। तदा सूर्यप्रकाशः सावशेषः आसीत्। तैलशकटं दृढप्रयत्नेन प्रचाल्यमानं सत् मन्थरं प्रयाति स्म। तस्यां यात्रायां ते थेस्स् नदीतीरमागच्छन्। तत्र हाहूः साधारणनौकाः यन्त्रनौकाश्च अपश्यत्। तन्महानगरं सर्वमवालोकयत्। सुमहतीर्वीथीः अपश्यत्। बाह्यनागरिकतां सर्वामपि अपश्यत्। तेषां तैलशकटं नौकाश्रयपर्यन्तं जगाम। सः तत्र थेम्स् नदीमपश्यत्। अवातरत्। पण्डितानवलोक्य अत्र नदी अस्ति किल। नास्तीति किमर्थमवदन् भवन्तः इति अपृच्छत्। पण्डिताः न वयं एतज्ज्ञानीमः इति अब्रुवन्। पण्डिताः न वयं एतज्ज्ञानीमः इति अनुवदन्। तत्र जनाः बृन्दं बृन्दं समागत्य तं द्रष्टुमारभन्त। सूर्यास्तमयानन्तरं हाहूः सम्पन्नेन सह तद्गृहमगच्छत्।

परेद्युः प्रातः सम्पन्नः उत्थाय हाहूं द्रष्टुम् तत्प्रकोष्ठकं प्राविशत्। तस्मिन् प्रकोष्ठके हाहूः नासीत्। अत्रान्तरे प्रभुत्वभवनात् सम्पन्नाय तन्त्रीवार्ता काचिदायाता। हाहूः थेम्स्नद्यां स्नाति इति। तस्मिन् समये लण्डन् नगरजनाः नैव प्रबुद्धाः। अर्धघण्टा–घण्टाभ्यन्तर एव निद्राणाः सर्वेऽपि उत्थाय

Public domain. Digitization Muthulakshmi Research Academy

थेम्स्नदीतीरमगच्छन्। तैलशकटानि निरन्तराण्यदृश्यन्त। जनाः नौकाः नौकादण्डांश्च अधिरुह्य पश्यन्ति स्म। हाहूः स्नानं करोति स्म। सः एकवारं जले निमज्ज्य समुत्थाय पक्षौ यथा चालयति तदा झंझावातेन समुद्रतरङ्गा इव नदीतरङ्गाः तीरं समभिघ्नन्ति। तीरे निबद्धाः महत्यः बाष्पनौकाः अपि विपरिवर्तन्ते। सामान्यनौकास्तु अधरोत्तरतामगच्छन्। सः जले उत्पत्य आकटि समुत्तिष्ठति। तदा वेलापर्वतमभिहत्य आधूर्णमानसमुद्रजलराशिरिव तदीयपक्षास्फालनेन थेम्स् नदीतरङ्गजलराशिः उत्तालमुत्पत्य दूरे नौकासु विद्यमानान् जनान् शीकरैः अभिवर्षति। यदा सः महातिमिङ्गल इव नदीमध्ये शीघ्रं प्लवमानः गच्छति तदा समुद्रे महानौकासु वेगेन गच्छन्तीषु तासां पश्चादिव जलविभाजकरेखा सान्तर्गता अनुपतति स्म। सः हस्ताभ्यां जलं ताडयति। तेन अशनिपातध्वनिरिव भवति। तदाघातवेगं नदी न सहत इव। अल्पीयांसं जलाशयं गजेन्द्रे प्रविष्टे यथा तत्रत्यजलं तटमाप्लावयति तथा थेम्सनदी जलं तटमाप्लावयत्, आघूर्णीच्च। तस्य स्नानं समीपवर्तिनामुपद्रवायाभूत्। नदीतः तस्य बहिरानायनं कथमिति ते नाध्यगच्छन्। एकघण्टानन्तरं स एव बहिराजगाम। अद्यापि हिमं तत्र वृष्यत एव। हाहूः ततः प्रस्थाय तत्सम्पन्नभवनं प्रति गच्छति स्म। सम्पन्नः पण्डिताः सर्वेऽपि तमन्वगच्छन्। सः तद्भवनं प्रविश्य पुनरपि प्राणायाम निष्ठितोऽभूत्। अथ नक्तं द्वादशघण्टाः अताड्यन्त। तथापि सः नोदतिष्ठत्। उषसि स एव गत्वा सम्पन्नमुदबोधयत्। पार्श्वे एव पण्डिताः अपि आसन्। सः एवं प्राह – "भवतां नदी अत्यल्पीयसी। अत एव यदा ह्यः प्रातः अहं स्नातुमुपक्रान्तः तदा केचित् प्लवाः अपि निमग्नाः अभवन्। नदी जले सर्वं घूर्णितमासीत्। तत्र मम स्नानं भवतामुपद्रवजनकमिति मया पश्चात् ज्ञातमासीत्। इतः परमहं भवदीयनद्यां न स्नास्यामि" इति। पण्डिताः "वयमपि तदेव वक्तुकामाः स्मः" इति अब्रुवन्।

In Public domain. Digitization Muthulakshmi Research Academy

उदितमासीत्। हाहू लण्डन्-नगरागमनात्परमनेन दिनेन दशमासाः व्यतीताः भवन्ति। प्रपञ्चे सर्वत्र हाहूकथाऽनभिज्ञ एव नासीत्। भारतदेशेऽपि अयं विषयः प्रचारितः अभवत्। तत्रत्याः सम्प्रदायज्ञाः "कोऽपि गन्धर्वः केनापि शापेन तत्र तथा पतितः स्यात्" इत्यवदन्। अन्ये केचन मन्दबुद्धयः "स्वत एव सोऽपि किमर्थं तथा न भवेत्। किङ्ग् काङ्ग् अस्ति किल" इति प्राहुः। भारत, चीना, जपान् देशेभ्योऽपि जनाः हाहूं द्रष्टुम् अगच्छन्। तत्तन्मतस्थाः स्वस्वपुराणेषु वर्णिताभिः तत्तादृशीभिः देवताभिः साम्यं हाहोः अकल्पयन्। धनवन्तः व्ययशीलिनश्च समागत्य तं दृष्ट्वा गच्छन्ति स्म।

10

हाह्वा सह पण्डितानां समागमाः चर्चाश्च विवर्धन्ते।

पण्डितः – अस्मद्देशमागतवतः भवतः दशमासाः व्यतीताः, अथापि भवन्तमधिकृत्य नास्माभिः किमपि ज्ञायते। भवद्देशमधिकृत्य वा भवज्जातिमधिकृत्य वा किमपि न ज्ञातम्। इतः परमपि भवान् किमस्मद्देशे एव अवतिष्ठासते। आहोस्वित् देशान्तराणि दिदृक्षते।

हाहूः – मदीयः विषयः भवद्भिः अधुनैव न ज्ञायते। कतिपयदिनेषु प्रकारान्तरेण सर्वं ज्ञापयिष्यामि।

पण्डितः – इतः कुत्र गमिष्यति भवान्।

हाहूः – तदेव पश्चात् ज्ञापयिष्यामि।

पण्डितः – भवदीयं ज्ञानं मनुष्याणां ज्ञानादपि अधिकं दृश्यते। अतः भवद्विदितान् अपूर्वान् अर्थान् कथयतु भवान्। मानवस्य मरणानन्तरं किं भवति।

हाहूः – विषयमिमं भवन्मताचार्यान् पृष्ट्वा जानीथ।

In Public domain. Digitization Muthulakshmi Research Academy

पण्डितः – अस्मन्मताचार्या इतः पूर्वमेव कयाचन विधया मरणानन्तरवृत्तान्तमवर्णयन्। तत्सत्यमेव वा।

हाहूः – तत्तन्मताचार्यैः उक्ताः विषयाः तत्तन्मतस्थानां कृते यथार्था एव। कुत इति चेत् तेषां ज्ञानं तत्संस्कारानुगुणं भवति। तेषां स्वभावोऽपि तद्विश्वसितुं पर्याप्तो भवति। लघुषु जलाशयेषु लघवो मत्स्याः भवन्ति। महाजलाशयेषु महान्तः मत्स्याः भवन्ति। समुद्रेषु तु तिमितिमिङ्गलादयो भवन्ति। लघुजलाशये विद्यमानं मत्स्यं यदि समुद्रं प्रवेशयामः सः अवश्यं मरिष्यते। अस्मदीया मनश्शक्तिः अस्मद्देशमस्मच्छरीरमस्मत्पूर्वेषामाचारांश्च अनुसृत्य भवति। अयमेषां कोऽपि गाढस्सम्बन्धः।

पण्डितः – वयमेतत्सर्वं जानीमः। एतान् विषयान् अधिकृत्य अस्मद्देशीयाः महान्ति शास्त्राणि व्यरचयन्।

हाहूः – तर्हि मया वक्तव्यमत्र किमवशिष्यते।

पण्डितः – परलोकमधिकृत्य।

हाहूः – भवच्छास्त्रेषु तदधिकृत्य नास्ति वा।

पण्डितः – अस्ति। किन्तु इदमित्थतया नास्ति सुनिश्चयः विश्वसनीयः।

हाहूः – मयापि तदेव उच्यते। सोऽपि विश्वासः व्यक्तिभेदेन भिद्यते। आत्मना अविश्वस्तः विषयः परैः प्रोच्यमानोऽपि न विश्वासपात्रं भवति। पर्वताग्रनिवासिने सुमद्रास्तित्वं वेदयामश्चेत् सः विश्वसिति। तेन किं प्रयेजनं भवति। स यदा साक्षात्

In Public domain. Digitization Muthulakshmi Research Academy

समुद्रं पश्यति तदा अनुभवभेदः किञ्चित् भवति। समुद्रप्रयाणसमये कोऽप्यनुभवः। समुद्रे निमज्ज्य रत्नानामुद्धरणसमये अन्यः अनुभवः भवति। अथापि किं प्रयोजनम्? किं तावतापि सः समुद्रं साकल्येन अज्ञासीत्? यो यो विषयः अस्माकमनुभवगोचारो भवति तेन तेनैवास्माकं चरितार्थता। अन्यैः शुष्कोपन्यासैः किमपि प्रयोजनं न भविष्यति। अत एव ज्ञेयविषयाणां बाहुल्यसम्पादनापेक्षया एकोऽपि विषयः अनुभवगोचरीक्रियेत चेत् तेनैव महती कृतार्थता।

तदीयोऽयमुपन्यासः यूरप् देशे सर्वासु पत्रिकासु प्रकटितः। उपैकादशषु मासेषु अद्य हाहोः विचित्ररूपसम्बन्धिनी जनेषु विचिकित्सा उपशान्तप्रायैव आसीत्। तदीयं रूपं परिचितत्वेनैव अद्य परिगण्यते। तस्य उपन्यासं पठित्वा यूरप् अमेरिका देशपण्डिताः तं तत्त्वदर्शिनममन्यन्त। किञ्चित् सः मतप्रवर्तकः इति व्यभावयन्। केचित् आलोचनापरः इत्यब्रुवन्। तदीयवचनानि श्रावं श्रावं पाठं पाठं यूरप् अमेरिका देशीयानां तद्विषयकमौत्सुक्यं प्रवर्धमानमभवत्। अयं तावन्मृगः। भाषते इत्येव कथं घटते इति कृत्वा ते तं द्रष्टुं पुनः बृन्दं बृन्दं सङ्घीभूय प्राचलन्। पुनरपि जनाः आत्मानं द्रष्टुं सङ्घीभूय समागच्छन्तीति हाहूः अवागच्छत्। अवगत्य प्राह – "मदीयः उपन्यासः भवद्भिः पत्रिकासु प्रकटितः। अथापि जनानां मयि जन्तुत्वबुद्धिः नापगता। किन्तु अभिवर्धते। कुत एतत्"।

अथ एकस्मिन् दिने हाहूं धूमशकटनिलयं नीत्वा धूमशकटानि प्रादर्शयन्। बाष्पनौकाः प्रादर्शयन्। शतघ्नीः प्रादर्शयन्। मुद्रणालयान् प्रादर्शयन्। तन्त्रीवार्तासंविधानानि प्रादर्शयन्। सर्वानेतानधिकृत्य व्यवृण्वन्। सः सर्वमवधानेन शुश्राव।

In Public domain. Digitization Muthulakshmi Research Academy

पण्डितः – प्रपञ्चेऽस्मिन् अस्माभिः बहवः महान्तः विषयाः उपज्ञायन्ते। एते इतः पूर्वं न केनापि ज्ञाताः। एषु भवतः किमपि आश्चर्यं न जनयति किम्?

हाहूः – विषयेऽस्मिन् किमप्याश्चर्यं नास्ति। यस्य बुद्धिः येन मार्गेण प्रसरति सः तदनुरूपाः आलोचनाः करोति। तदा ईदृशविचित्राणि आविर्भवन्ति।

पण्डितः – प्रपञ्चेऽस्मिन् नान्येन केनापि ईदृशानि उदपाद्यन्त।

हाहूः – तैः कर्तुं शक्यम् तैः कृतम्। अपि नाम भवन्तः भारतदेशं जानन्ति।

पण्डिताः आमित्यवदन्। तदनु हाहूः किमपि नाभाषत। ततः तं जन्तुप्रदर्शनशालामनयन्। सा च शाला आफ्रिका महारण्यमिव दृश्यते। पण्डित एकः विहस्य हाहूमवदत् – "वस्तुतः भवान् प्रथममत्रैव प्रवेशनीयः अभूत्" इति। सर्वेऽपि मृगशालां प्राविशन्। अन्तः प्रविशन्तं हाहूं द्विन्राः मृगाः अवालोकयन्। तदीयं गन्धमजिघ्रन्। मृगशालायां सर्वे मृगाः समकण्ठमुदजुघूषन्। तेन महता घोषेण तत्र जनाः स्थातुं न प्राभवन्। केचन महामृगाः स्वीयानि पञ्जराणि निर्भिद्य बहिरापतितुं प्रायतन्त। केचन वानराः द्वौ गजौ त्रिचतुराः नक्राश्च स्वस्वस्थानानि विहाय बहिरागच्छन्। घोरस्यास्य परिणामस्य कारणं किमिति ते अविज्ञाय तत्रसुः। तदा हाहूः जन्तूनां तं कोलाहलं श्रुत्वा जनस्य व्याकुलभावञ्च ज्ञात्वा पण्डितैस्सह बहिराजगाम।

तदनु चतुर्थदिवसे कस्यचन सम्पन्नस्य गृहे महदातिथ्यं निर्व्यूढम्। लण्डन् नगरे हाहू दर्शनादनन्तरं तेन दिनेन संवत्सरः पूर्णो भवति। तस्मिन् दिने नक्तमष्टघण्टासमये आतिथ्यमारभ्यत। तत्र हाहूरपि आहूतः सोऽप्यगच्छत्। तं परितः पण्डिताः उपाविशन्। रात्रौ एकादशघण्टाप्रान्ते आतिथ्यं सर्वमपि निर्वर्तितमासीत्। तदा कस्यचन जर्मन् सङ्गीतशास्त्रज्ञस्य पियानोवाद्यमुखेन

In Public domain. Digitization Muthulakshmi Research Academy

तद्रचितनवीनगीतिकायाः गानाय अवकाशः प्रदत्तः। इतः पूर्वमेव पण्डितैस्सह सम्भाषणसमये यूरप्देशे महान्तः सङ्गीतशास्त्रनिष्णाताः सन्तीति हाहूः अज्ञासीत्। अथापि तेषां सङ्गीतं सः कदापि न शुश्राव। तस्यां तत्र स जर्मन् पण्डितः समायातः। सः शरीरेण ह्रस्वः सूरणकन्द इव अरुणवर्णः नीलं यामं, धौतं कञ्चुकञ्च अधारयत्। सः पियानोसमीपे समुपविश्य तदीयरीडोपरि अङ्गुलीः निक्षिपन् ध्वनितरङ्गान् अजनयत्। बास् स्वरेण गाने सः अत्यन्तं प्रसिद्धः। स्वपद्धत्या सः गातुं वादयितुञ्च आरभत। भवने सर्वत्र अश्वानां हेषाः इव चित्रविचित्राः ध्वनयः व्याप्नुवन्। तावत्पर्यन्तमुपविष्टः हाहूः उत्थाय पियनोसमीपं जगाम। पण्डिताः अपि तमन्वगच्छन्। जर्मन् पण्डिते वादयति हाहूः सावधानमपश्यत्। सः किमर्थं तथा पश्यति इति न कोऽपि जानाति। कश्चन मृगः समेत्य कमपि मधुरध्वनिविशेषमौचित्येन परिशीलयतीति सभासदः अचिन्तयन्। जर्मन् पण्डितः स्वीयगानविद्यानैपुणीं सर्वामपि अभिवृष्य अप्सु खण्डशर्करामिव वायुतरङ्गेषु गीतध्वनिं व्यलालयत्। जनः सर्वोऽपि आश्चर्यचकितः आसीत्। अन्ते जर्मन् पण्डितः उत्थाय सर्वान् विलोक्य सविनयं प्रणतः अतिष्ठत्। अनुपदमेव हाहूः पियानोरीडोपरि अङ्गुलीः न्यवेशयत्। मधुरध्वनयः उदभवन्। जनाः साश्चर्यं पश्यन्ति स्म। तदा हाहूः कञ्चन पण्डितमाहूय किमपि पिहितं पत्रम् तस्य हस्ते दत्वा एतत् श्वः प्रातः भवद्भिः द्रष्टव्यमिति अवदत्। पण्डितः तथेति तत्पत्रं जग्राह। पियानोतः पुनः ध्वनिः अश्रूयत। हाहूः उद्ग्रीवं धैवतस्वरेण किमपि गायति स्म। धैवतस्य तत् माधुर्यं न केनापि अवगतमासीत्। जर्मन् गायकः हाहूमाश्चर्येण विलोकयन् अतिष्ठत्। चित्रविचित्रो ध्वनिः उदभवत्। सूक्ष्ममुखात् विनिस्सरत् आपूर्णजलमिव समतलशिलामुखं निघ्नन् समुद्रतरङ्ग इव च सः ध्वनीन् व्यापयत्। एवमर्धघण्टापर्यन्तं हाहूः अगायत। प्रकृतिः निश्शब्दा आसीत्।

In Public domain. Digitization Muthulakshmi Research Academy

अत्रान्तरे हाहूः उत्थाय एकवारं सर्वजनान् अपश्यत् । पियानोवाद्यं च अत्यजत् । केवलं गायति स्म। पुनः किञ्चित्कालानन्तरं जनः अपश्यत्, हाहोः हस्ते महती वीणा अदृश्यत। सः तत्तन्त्रीः अङ्गुल्यग्रैः सारयन् गायति स्म। तदा जनानां मनांसि स्ववशानि नासन्। सा वीणा कथमायातेति न कोऽपि आलोचयत्। जगत् सर्वमपि स्वश्रवणेन्द्रिये विलीनमिव अभात्। एवं दृष्टः हाहूः पुनरवलोकने नादृश्यत। तस्य गीतं तद्भवनप्राङ्गणे श्रूयमाण आसीत्। सर्वे जनाः प्राङ्गणं प्रापुः। सः आकाशे डयमानः अदृश्यत। वीणां वादयतः तस्य वीणारवः समुद्रतरङ्ग इव भूमिं प्राप्य नादयति स्म। आकाशे तद्गीतं दूरं दूरं गच्छति स्म। अत्रान्तरे तेषु केषुचित् स्मृतिः आयाता। ते कानिचन विमानानि तम् अनुप्रैषयन्। तेषु कानिचित् विमानानि प्रत्यागतानि। कानिचित् नैवागतानि।

परेद्युः प्रातः हाह्वा स्वहस्ते दत्तं तत्पत्रं स पण्डितः उद्घाट्य अपठत्। तस्मिन् संस्कृतभाषया एवं विलिखितम् अभूत् – मृगेषु कृत्रिमत्वं न प्रविष्टम्। अतः तेषु परप्रत्यभिज्ञानशक्तिः न नष्टा। अत एव यदा अहम् जन्तुशालां प्राविशम् तदा जन्तवः तथा अघुष्यन्। मनवः कृत्रिमं ज्ञानम् अभिवर्धयन् नष्टो भवति। कतपयदिनेभ्यः पूर्वं केनचन पण्डितेन पृष्टः प्रश्नः सम्प्रति समाधीयते। सः पण्डितः "अस्मान् भवान् किमिति अभिमनुते?" इति अपृच्छत्। अहम् एवं चिन्तयामि – "व्यामोहेन निष्प्रयोजनकार्यकरणलम्पटचित्तान् भवादृशः प्राणिनः न क्वाप्यहम् अवालोकयम्। अस्मदीयम् गन्धर्वलोकं गत्वा एतदेव वक्ष्ये" इति॥ इति शम्॥

समाप्तोऽयं प्रबन्धः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy
ISBN - 978-93-80171-15-9



परिचयः

किडाम्बि श्रीनिवासरामानुजाचार्याः क्रि.श.१९३० तमे वर्षे तिरुपतौ आविर्भूताः। माता श्रीमती जानकम्मा। पितरः उभयवेदान्तविद्वदग्रेसराः वैयाकरणपञ्चानना: वेङ्कटनरसिंहाचार्यस्वामिनः। विद्याभ्यासः नेल्लूरुनगरे। अध्यात्मगुरवः पितृपादाः। क्रि.श.१९६० तमे वर्षे नेल्लूरु वेदसंस्कृतकलाशालायामध्यापकत्वेन प्रविष्टाः, षोडशवर्षाणि व्याख्यातृत्वेन, ततः चतुर्दशवर्षाणि कलाशालाध्यक्षत्वेन च कार्यं निरुह्य क्रि.श.१९९०तमे वर्षे निवृत्ताः। साहित्यं प्रधानं शास्त्रं चेदपि व्याकरणे, उभयवेदान्तयोः अपि निष्णातारः एते संस्कृते सरससरलरचनाधुरन्धराः। शुकसन्देशः, सन्देशकाव्यं, सौगतम् (बुद्धचरिते कश्चनघट्टः), निद्राविभूतिः, अनेकानि स्तोत्राणि च एतेषां काव्यरचनावैदग्ध्यं प्रकाशयन्ति। एतैः कृताः आन्ध्रभाषायां भूतपूर्वान्ध्रराष्ट्रमुख्यमन्त्रिणां बेजवाडगोपालरेड्डि महोदयानां "स्वप्नमु-नेडु" इति कविताद्वयस्य "उल्लेखमञ्जरी" नाम्ना, "गुलिस्थान्" इति नाम्नः सौदीकवितासम्पुटस्य "सुभाषितपुष्पवाटिका" नाम्ना, हाहाहूहूनवलायाश्च अनुवादाः परिगणनीयाः। सेवानिवृत्तेरनन्तरम् एते उभयवेदान्तसभायाः अध्यक्षाः भूत्वा रामानुजदर्शनस्य प्रचाराय बद्धदीक्षाः सरलान्ध्रभाषायाम् अनेकेषां दार्शनिकग्रन्थानां व्याख्यामरचयन्। एते च तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन क्रि.श.१९९९ तमे वर्षे "विद्यावाचस्पति" गौरवोपाधिना, उभयवेदान्तसभया "उभयवेदान्तवाचस्पति" बिरुदेन, क्रि.श.२०००तमे वर्षे श्री त्रिदण्डिचिन्नजीयर् स्वामिभिः "गोपालोपायनेन" च सत्कृताः सहृदयतल्लजाः आत्मगुणपरिपूर्णाश्च आसन्। एते च स्वीये अशीतितमे वयसि तद्विष्णोः परमं पदं प्राप्नुयुः।

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः, हैदराबाद्